





# मेघदूतम्

महाकविकालिदासविरचितम्।

मल्लिनाथसूरिविरचितसञ्जीवनीटीकासमेतम्।

वि, ए, उपाधिधारिणा

श्रीजीवानन्दविद्यासागरभट्टाचार्य्येण

संशोध्य प्रकाशितम्।

द्वितीयसंस्करणम्।

कलिकातानगरे

सरस्वतीयन्त्रे

मुद्रितम्।

सं १८८६।

कर्मणि
ोति कश्चि-
प्रमत्तोऽनवहितः

প্রকাশক—শ্রীজীবানন্দবিদ্যাসাগর বি, এ,
২নং রমানাথমজুমদারের ষ্ট্রীট,
কলিকাতা।

প্রণ্টর—শ্রীক্ষেত্রমোহন মুখোপাধ্যায়
৫৬ নং আমহার্ষ্ট ষ্ট্রীট,
কলিকাতা।

# मेघदूतम् ।

## पूर्वमेघः ।

कश्चित् कान्ताविरहगुरुणा स्वाधिकारप्रमत्तः
शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्तुः ।

मातापित्रभ्यां जगतो नमो वामाङ्गजानये ।
सद्योदक्षिणैटक्पातसंकुचद्दामदृष्टये ॥ १॥

अन्तराय तिमिरोपशान्तये
शान्तपावनमचिन्त्यवैभवम् ।
तन्नरं वपुषि कुञ्जरं मुखे
मन्महे किमपि तुन्दिलं महः ॥ २ ॥

शरणं करवाणि कामदन्ते
चरणं वारिण ! चराचरोपजीव्यम् ।
करुणामसृणैः कटाक्षपातैः
कुरु मामम्ब ! कृताघसार्थवाहम् ॥ ३॥

दृष्टान्वयमुखेनैव सर्वं व्याख्यायते मया ।
नामूलं लिख्यते किञ्चिन्नानपेक्षितमुच्यते ॥४॥

आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखं मित्य शास्त्रात् काव्यादौ वस्तुनिर्देशात् कथां प्रस्तौति कश्चिदिति । स्वाधिकारात् स्वनियोगात् प्रमत्तोऽनवहितः

यत्रास्रक्ते जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥१॥

प्रमादोऽनवधानंत्यमरः । जुगुप्साविरामप्रमादार्थाना-
मसख्यानमित्यपादानत्वात् पञ्चमी । अतएवापराधादितीः
कान्ताविरहेण गुरुणा दुर्भरेण दुस्तरेणित्यर्थः गुरुस्तु गोष्पतौ
च गुरौ श्लिष्टे पितरि दुर्भर इति विश्व. । वर्षं सवत्सर
भोग्येन कालाध्वनोरत्यन्तसंयोग इति द्वितीया । अत्यन्त-
संयोगे चेति समासः । कृमति चेति णत्वम् । भर्तुः
स्वामिनः शापेन अस्तङ्गमितो महिमा सामर्थ्यं यस्य
सोऽस्तङ्गमितमहिमा अस्तमिति मकारान्तमव्ययम तस्य
द्वितीयेति योगविभागात् समासः । कश्चित् अनिर्दिष्ट-
नामा यक्षो देवयोनिविशेषः विद्याधराप्सरोयक्षरक्षो-
गन्धर्वकिन्नराः । पिशाचो गुह्यकः सिद्धो भूतोऽमी देव
योनयः इत्यमरः । जनकतनयायाः सीतायाः स्नानैः अव-
गाहैः पुण्यानि पवित्राणि उदकानि येषु तेषु पावनेषु
इत्यर्थः । छायाप्रधानास्तरवः छायातरवः शाकपार्थिवा-
दित्वात् समासः । स्निग्धाः सान्द्राः छायातरवो नमेरुवृक्षा
येषु तेषु वसतियोग्येषु इत्यर्थः स्निग्धन्तु मसृणे सान्द्रे इति
छायावृक्षो नमेरुः स्यादिति च शब्दार्णवे । रामगिरेः
चित्रकूटस्याश्रमेषु वसतिम् वहिवसतिभ्यश्चेत्यौणादिको-
ऽतिप्रत्ययः चक्रे कृतवान् । अत्र रसो विप्रलम्भाख्यः शृङ्गारः
सत्रापि उन्मादावस्था अतएव एकत्रानवस्थान सूचितम् ।
आश्रमेष्विति बहुवचनेन सीतां प्रति रामस्य हनूमत्स-

**तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी**
**नीत्वा मासान् कनकवलयभ्रंशरिक्तप्रकोष्ठः।**
**आषाढ़स्य प्रथमदिवसे मेघमाश्लिष्टसानुं**
**वप्रक्रीड़ापरिणतगजप्रेक्षणीयं ददर्श ॥२॥**

न्देश मनसि निधाय मेघसन्देशं कविः कृतवान् इत्याहुः। अत काव्ये सर्वत्र मन्दाक्रान्ताव्रत्तम। मन्दाक्रान्ता जल-धिषड्गैर्मौ नतौ ताद्गुरू चेदिति ॥१॥

तस्मिन्निति। तस्मिन् अद्रौ चित्रकूटाद्रौ अबलावि-प्रयुक्तः कान्ताविरही कनकस्य वलयः कटक कटक वलयो ऽस्त्रियामित्यमरः। तस्य भ्रंशेन पातेन रिक्तः शून्यः प्रकोष्ठः कूर्परात् अधःप्रदेशो यस्य सः तथोक्तः कक्षान्तर प्रकोष्ठ. स्यात् प्रकोष्ठः कूर्परादध इति शाश्वतः। विरहदुःखात क्षय इत्यर्थः। कामुकः स यक्षः कतिचित् मासान् अष्टौ मासान् इत्यर्थः मासानन्यान् गमय चतुर इति वक्ष्यमाणत्वात् नीत्वा यापयित्वा आषाढ़ानक्षत्रेण युक्ता पौर्णमासी आषाढ़ी नक्षत्रेण युक्तः काल इत्यण्। टिड्ढाणञित्यादिना ङीप्। सा आषाढ़ी अस्मिन पौर्णमासीति आषाढ़ो मासः साऽस्मिन् पौर्णमासीति संज्ञायामित्यण्। तस्य प्रथमदिवसे आश्लिष्ट-सानुम् आक्रान्ततटम् वप्रक्रीडा उत्खातकेलयः उत्खात-केलिः क्रीड़ायैवप्रक्रीड़ा निगद्यते इति शब्दार्णवे। तास्य परिणतः तिर्य्यग्दन्तप्रहारः तिर्य्यग्दन्तप्रहारस्तु गजः परि-णतो मत इति हलायुधः। स चासौ गजश्च स इव प्रेक्ष-णीयो दर्शनीयः तं मेघं ददर्श। गजप्रेक्षणीयमित्यत्र इवलो-

**तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतो-**
**रन्तर्वाष्पश्चिरमनुचरो राजराजस्य दध्यौ ।**

यात् लुप्तोपमा। कंचित् आषाढ़स्य प्रथमदिवसे इत्यत्र प्रत्यासन्ने नभसीति वक्ष्यमाणनभोमासप्रत्यासत्त्यर्थं प्रथमदिवसे इति पाठं कल्पयन्ति तदसङ्गतम प्रथमातिरिक्ते कारणाभावात नभोमासस्य प्रत्यासत्त्यर्थमिति चेत् न प्रत्यासत्तिमात्रस्य मासप्रत्यासत्त्येव प्रथमदिवसस्याप्युपपत्तेः अत्यन्तप्रत्यासत्तेरुपयोगाभावेन अविवक्षितत्वात् विवक्षितत्वे वा स्वपक्षेऽपि प्रथमदिवसातिक्रमेण मेघदर्शनकल्पनायां प्रमाणाभावेन तदसम्भवात् प्रत्युत अस्मत्पक्षे एव कुशलसन्देशस्य भाव्यनर्थप्रतीकारार्थस्य पुरत एव अनुमानमुक्तं भवतीति उपयोगसिद्धिः। ननु उन्मत्तस्य नायं विवेक इति चेत् न उन्मत्तस्य न अनर्थस्य प्रतीकारार्थं प्रवृत्तिरपीति सन्देश एव मा भूत् तथाच काव्यारम्भ एव अप्रसिद्धः स्यात् इत्यहो मूलच्छेदो पाण्डित्यप्रकर्षः। कथं तर्हि शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणावित्यादिना भगवतप्रबोधावधिकस्य शापस्य मासचतुष्टयावशिष्टस्योक्तिः दशस्त्वसाधिक्यादिति चेत् स्वपक्षेऽपि कथं सा विंशतिदिवसैर्न्यूनत्वादिति सन्तोष्टव्यम्। तस्मात् ईषद्वैषम्यमविवक्षितमिति सुष्ठूक्तं प्रथमदिवसे इति ।२॥

तस्येति। राजानौ यक्षाः राजा प्रभौ नृपे चन्द्रे यक्षे क्षत्रियशक्रयोरिति विश्वः। राज्ञां राजा राजराजः कुबेरः राजराजो धनाधिप इत्यमरः। राजाहःसखि-

**मैत्रालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः**
**कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ॥२॥**
**प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी**
**जीमूतेन स्वकुशलमयीं हारयिष्यन् प्रवृत्तिम् ।**

व्यृद्धिति टच्प्रत्ययः । तस्यानुचरो वयः अन्तर्वाष्पो धीराद्यत्तत्वात् अन्तस्तम्भितायुः सन् कौतुकाधानहेतोः अभिलाषोत्पादकारणस्य कौतुकस्याभिलाषे स्यादुत्सवे नर्म-हर्षयोरिति विश्व । तस्य मेघस्य अग्रे कथमपि गरीयसा प्रयत्ने नित्यर्थः । ज्ञानहेतुविचक्षायामप्यादि कथमव्ययम् । कथमादि तथाप्यन्तं यत्नगौरववाढ़र्योरित्युज्ज्वलः । स्थित्वा चिरं ध्यौ चिन्तायामास ध्यै चिन्तायामिति धातोर्लिट् । मनोनिर्वाणोपक्रमनपर्यन्तमिति शेषः । विकारहेतुमाह मैत्रालोके इति मैत्रालोके मैत्रदर्शने सति सुखिनोऽपि प्रियादिजनसङ्गतस्यापि चेतः चित्तम् अन्यथाभूता वृत्तिः व्यापारो यस्य तत् अन्यथावृत्ति भवति विकृतिमापद्यते इत्यर्थः कण्ठाश्लेषप्रणयिनि कण्ठालिङ्गनार्थिनि जने दूरे संस्था स्थितिर्यस्य तस्मिन् दूरसंस्थे सति किं पुनः विरहिणः किमुत वक्तव्यमित्यर्थः विरहिणां मेघसन्दर्शनम् उद्दीपनं भवतीति भावः । अर्थान्तरन्यासोऽलङ्कारः । तदुक्तं दण्डिना, ज्ञेयः सोऽर्थान्तरन्यासो वस्तु प्रस्तुत्य किञ्चन । यत्साधन-समर्थस्य न्यासो योऽन्यस्य वस्तुन इति ॥२॥

अथ समाहितान्तःकरणः सन् किं कृतवान् इत्याह प्रत्यासन्ने इति । स यक्षो यक्षिरं दयो स इत्यर्थः नभसि

स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै
प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ॥४॥

आवगे नभाः आवगिकश्च स इत्यमरः । प्रत्यासन्ने आषाढ़स्य अनन्तरं सन्निकृष्टे प्राप्ते सतीत्यर्थः दयिताजीवितालम्बनार्थी सन् वर्षाकालस्य विरहदुःखजनकत्वादुत्पन्नार्घप्रतीकारादनर्थोत्पत्तिप्रतिबन्ध एव वरमिति न्यायेन प्रागेव प्रियाप्राणधारणोपायं चिकीर्षुरित्यर्थः जीवनस्य उदकस्य भूतः पटबन्धो जीमूतः, पृषादरादित्वात् साधुः । भूतः स्यात्पटबन्धेऽपीति रुद्रः । तेन जीमूतेन जलधरेण प्रयोज्येन स्वकुशलमयीं स्वक्षेमप्रधानां प्रवृत्तिं वार्त्तां वार्त्ता प्रवृत्तिर्वृत्तान्त इत्यमरः । हारयिष्यन् प्रापयिष्यन् लृट् शेषे चेति चकारात् क्रियार्थक्रियोपपदात् लृट्प्रत्ययः । जीवनार्थं कर्म जीवनप्रदेनैव कर्त्तव्यमिति भावः हृक्रोरन्यतरस्यामिति कर्मसंज्ञया विकल्पात् पक्षे कर्त्तरि तृतीया । प्रत्यग्रैरभिनवैः कुटजकुसुमैः गिरिमल्लिकाभिः कुटजो गिरिमल्लिकेति हलायुधः । कल्पितार्घाय कल्पितः अनुष्ठितः अर्घः पूजाविधिर्यस्य तस्मै मूल्ये पूजाविधावर्घ इत्यमरः । तस्मै जीमूताय क्रियाग्रहणमपि कर्त्तव्यमिति सम्प्रदानत्वाच्चतुर्थी । प्रीतिप्रमुखानि प्रीतिपूर्वकानि वचनानि यस्मिन् कर्मणि तत् प्रीतिप्रमुखवचनं यथा तथा शोभनम् आगतं स्वागतं स्वागतवचनं प्रीतः सन् व्याजहार कुशलागमनं पप्रच्छ इत्यर्थः ॥४॥

धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ॥५॥
जातं वंशे भुवनविदिते पुष्करावर्त्तकानां

ननु चेतनसाध्यमर्थं कथमचेतनेन कारयितुं प्रवृत्त इत्यपेक्षायां कविः समाधत्ते, धूमेति। धूमश्च ज्योतिश्च सलिलञ्च मरुत वायुश्च तेषां सान्निपातः सङ्घातो मेघः क्व अचेतनत्वात् सन्देशानर्हः इत्यर्थः। पटुकरणैः समर्थेन्द्रियैः करणं साधकतमं चेत्रगात्रेन्द्रियेष्वपीत्यमरः। प्राणिभिः चेतनैः प्राणी तु चेतनो जन्तोत्यमरः। प्रापणीयाः प्रापयितव्याः सन्दिश्यन्ते इति सन्देशाः ते एव अर्थाः क्व इत्येवम् औत्सुक्यात् इष्टार्थोद्गतत्वात् इष्टार्थोद्युक्त उत्सुक इत्यमरः। अपरिगणयन् अविचारयन् गुह्यको यक्षः तं मेघं ययाचे याचितवान्। तथाहि कामार्त्ताः मदनातुराः चेतनाश्चेतनाश्च तेषु विषये प्रकृतिकृपणाः स्वभावदीनाः कामान्धानां युक्तायुक्तविवेकशून्यत्वात् अचेतनयाञ्ञा न विरुध्यते इत्यर्थः। अत्र मेघसन्देशयोर्विरूपयोर्घटनात् विषमालङ्कारः। तदुक्तं, विरुद्धकार्य्यस्योत्पत्तिर्यत्रानर्थस्य वा भवेत्। विरूपघटना यत्नौ विषमालङ्कृतिस्त्विति। सा च अर्थान्तरन्यासानुप्राणिता तत्समर्थकत्वेनैव चतुर्थपादे तस्योपन्यासात् ॥५॥

अमाति याञ्ञाप्रकारमाह, जातमिति। हे मेघ!

जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः ।
तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर्गतोऽहं
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा ॥ ६

त्वां भुवनेषु विदितं भुवनविदितं निष्ठेति भूतार्थे क्तः गतिबुद्धीत्यादिना वर्त्तमानार्थत्वेऽपि क्तस्य च वर्त्तमाने इति भुवनशब्दस्य षष्ठ्यन्ततानियमात् समासो न स्यात् तेन च पूजायामिति निषेधात्। पुष्करावर्त्तकाश्च कचित् मेघानां श्रेष्ठाः तेषां वंशे जातं महाकुलप्रसूतमित्यर्थः कामरूपम् इच्छाधीनविग्रहं दुर्गादिरक्षारक्षममित्यर्थः मघोनः इन्द्रस्य प्रकृतिपुरुषं प्रधानपुरुषं जानामि तेन तत्प्रभुत्वादि जानामीत्यादिगुणयोगित्वेन हेतुना विधिवशात् दैवायत्तत्वात् विधिविधाने दैवे चेत्यमरः। वशमायत्ते वशमिच्छाप्रभेदयोगिति विश्वः। दूरे बन्धुर्यस्य स दूरबन्धुः वियुक्तभार्य्योऽहं त्वयि अर्थित्वं गतः। ननु याचकस्य याच्ञायां याच्यगुणोत्कर्षः कुत्र उपयुज्यते इत्याशङ्क्य दैवात् याच्ञाभङ्गेऽपि लाघवदोषाभाव एव उपयोग इत्याह चाञ्चेति अधिगुणे अधिकगुणे पुंसि विषये याच्ञा मोघा निष्फलापि वरम् ईषत् प्रियं दातुर्गुणाख्यत्वात् प्रियत्वं याच्ञावैफल्यात् ईषत् प्रियमिति भावः अधमे निर्गुणे याच्ञा लब्धकामापि सफलापि न वरम् ईषत् प्रियमपि न अवतीत्यर्थः दैवात् हते वरः श्रेष्ठे त्रिषु क्लीबे मनाक्प्रिये इत्यमरः। अर्थान्तरन्यासानुप्राणितः प्रियोऽलङ्कारः। तदुक्तं दण्डिना, प्रियः प्रियतराख्यानमिति। एतत्

**सन्तप्तानां त्वमसि शरणं तत् पयोद ! प्रियायाः**
**सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य।**
**गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां**
**वाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या॥७**

आद्यपादत्रये चतुर्थपादस्थेन अर्थान्तरन्यासेन उपजीवि-
तमिति सुव्यक्तमेतत् ॥६॥

सन्तप्तानामिति। हे पयोद! त्वं सन्ततानामातपेन वा प्रवासविरहेण वा संज्वरितानां सन्तापः संज्वरः समा-धित्यमरः। शरणं पयोदानेन आतपखिन्नानां प्रोषितानां स्वस्थानप्रेरणया च रक्षकोऽसि शरणं गृहरक्षितौरित्यमरः। तत् तस्मात् कारणात् धनपतेः कुबेरस्य क्रोधेन विश्लेषि-तस्य प्रियया वियोजितस्य मे मम सन्देशं वार्त्तां प्रियायाः हर प्रियां प्रति नय इत्यर्थः। सम्बन्धसामान्ये षष्ठी। सन्देशहरणेन आवयोः सन्तापं नुद इत्यर्थः। कुत्र स्थाने सा स्थिता तत्स्थानस्य वा किं व्यावर्त्तकं तत्राह गन्त-व्येति वहिर्भवं वाह्यं वहिर्देवपञ्चजनेभ्य इत्यमरः। वाह्ये उद्याने स्थितस्य हरस्य शिरसि या चन्द्रिका तया धौतानि निर्मलानि हर्म्याणि धनिकभवनानि यस्यां सा तथोक्ता हर्म्यादि धनिनां वास इत्यमरः। अनेन व्यावर्त्तकमुक्तम्। अलका नाम अलका इति प्रसिद्धा यक्षेश्वराणां वसतिः स्थानं ते तव गन्तव्या त्वया गन्तव्या इत्यर्थः कृत्यानां कर्त्त-रि वेति षष्ठी ॥७॥

त्वामारूढं पवनपदवीमुद्गृहीतालकान्ताः
प्रेक्षिष्यन्ते पथिकवनिताः प्रत्ययादाश्वसत्यः ।
कः सन्नद्धे विरहविधुरां त्वय्युपेक्षेत जायां
न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः॥
मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां
वामश्चायं नदति मधुरं चातकस्ते सगन्धः ।

मदयं प्रस्थितस्य ते पथिकाङ्गनाजनाश्वासनम आनुषङ्गिकं फलम इत्याह त्वामिति । पवनपदवीम् आकाशम आरूढं त्वां पन्थानं गच्छन्ति ते पथिकाः पथः ष्कनिति ष्कन्प्रत्ययः । तेषां वनिताः प्रोषितभर्तृकाः प्रत्ययात् प्रियागमनविश्वासात् प्रत्ययोऽधीनगपथज्ञानविश्वासहेतुरित्यमरः । आश्वसत्यो विश्वसिताः श्वसिधातोः शतृन्तात ङीगतश्चेति ङीप तथा उद्गृहीतालकान्ताः दृष्टिप्रसारार्थम उन्नमय्य धृतालकाग्राः सत्यः प्रेक्षिष्यन्ते अत्युत्कण्ठतया द्रक्ष्यन्ति इत्यर्थः । तथाहि त्वयि सन्नद्धे व्यापृते सति विरहेण विधुरां विवशां जायां कः उपेक्षेत न कोऽपि इत्यर्थः अन्योऽपि मद्व्यतिरिक्तोऽपि यो जनः अहमिव पराधीनवृत्तिः परायत्तजीविको न स्यात् स्वतन्त्रस्तु न कोऽपि उपेक्षेत इति भावः । अर्थान्तरन्यासः ॥८॥

निमित्तान्यपि ते शुभानि दृश्यन्ते इत्याह मन्दं मन्दमिति । अनुकूलः पवनो वायुः त्वां मन्दं मन्दम् अतिमन्दमित्यर्थः अत्र कथञ्चित् वीप्सायामेव द्विरुक्तिर्निर्वाह्या

गर्भाधानक्षणपरिचयान्नूनमाबद्धमालाः
सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः ॥९॥

प्रकारे गुणवचनस्य इत्येतदाश्रयणे तु कर्मधारयवद्भावे सुबलुकि मन्दमन्दमिति स्यात् तदेवाह वामनः । मन्दं मन्दमित्यव्ययप्रकारार्थे द्विर्भाव इति । यथा सदृशं भाविफलानुरूपम इत्यर्थः यथा सादृश्ययोग्यत्वदीपसास्वार्थानतिक्रमे इति यादवः । नदति प्रेरयति अयं सगन्धः सगर्वः सम्बन्धी इति कश्चित् गन्धो गन्धक आमोदे लेशे सम्बन्धगर्वयोरिति विश्वः । ते तव वामो वामभागस्थः वामस्तु वक्रे रम्ये स्यात् सव्ये यामगतेऽपि चेति शब्दार्णवे । चातकः पक्षिविशेषश्च मधुरं श्राव्यं नदति व्याहरति इदं निमित्तद्वयं वर्त्तते वर्त्तिष्यते च अपरं निमित्तम इत्याह गर्भेति गर्भः कुक्षिस्थो जन्तुः गर्भोऽपकारके ह्यग्नौ सुते पनसकण्टके । कुक्षौ कुक्षिस्थजन्तौ चेति यादवः । तस्य आधानम् उत्पादनं तदेव क्षणः उत्सवः सुखहेतुत्वादिति भावः निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षण इत्यमरः । तस्मिन् परिचयात् अभ्यासात् हेतोः खे व्योम्नि आबद्धमाला गर्भाधानसुखार्थं त्वत्समीपं बद्धपंक्तयः इत्यर्थः उक्तञ्च कर्णोदये, गर्भं बलाका दधतोऽभ्रयोगान्नाके निबद्धावलयः समन्तात् । बलाकाः वकाङ्गनाः नयनसुभग दृष्टिप्रियं भवन्तं नूनं सत्यं सेविष्यन्ते । अनुकूलमारुतचातकशब्दितबलाकादर्शनानां शुभसूचकत्वं शकुनशास्त्रे दृष्टं तत् विस्तरभयान्न लेखि ॥९॥

ताञ्चावश्यं दिवसगणनातत्परामेकपत्नी-
मव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायाम् ।
आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां
सद्यःपाति प्रणयि हृदयं विप्रयोगे रुणद्धि ॥१०॥
कर्त्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रामवन्ध्यां
तच्छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसोत्काः ।

न च तस्या नाथात् व्रतस्थानाद्वा निरर्थकत्वत्-प्रवास इत्याह तामिति । हे सखे ! दिवसानाम् अवशिष्ट-दिनानां गणनायां संख्याने तत्पराम् आसक्तां तत्परे प्रसि-तासक्तावित्यमरः । अतएव अव्यापन्नाम अमृतां यापा-वसाने मदागमनप्रत्याशया जीवन्तीम् इत्यर्थः एकः पति-र्यस्याः सा एकपत्नी तां पतिव्रताम् इत्यर्थः नित्यं सपत्नी-दिष्विति ङीप् नकारश्च । भ्रातुः मे जायां भ्रातृजायां मातृवत् निःशङ्कं दर्शनीयाम् इत्याशयः तां मत्प्रियाम् अविहतगतिः अविच्छिन्नगतिः सन् अवश्यं द्रक्ष्यसि च आलोकयिष्यसे च । तथाहि आशातितृष्णा आशा दिग-तितृष्णयोरिति यादवः । बध्यतेऽनेन इति बन्धः बन्धनं हन्तमिति यावत् आशा एव बन्धः आशाबन्धः कर्त्ता प्रणयि प्रेमयुक्तम् अतएव कुसुमसदृशं सुकुमारमित्यर्थः अतएव विप्रयोगे विरहे सद्यःपाति सद्योभ्रंशनशीलमङ्गनानां हृदयं जीवितं हृदयं जीवितं चित्तं इति शब्दार्णवे । प्रायशः प्रायेण रुणद्धि प्रतिबध्नाति । अर्थान्तरन्यासः ।१०॥

सम्प्रति सहायसम्पत्तिश्चास्ति इत्याह कर्त्तुमिति ।

**आ कैलासादिसकिसलयच्छेदपाथेयवन्तः**
**सम्पत्स्यन्ते नभसि भवतो राजहंसाः सहायाः ११**
**आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य शैलं**
**वन्द्यैः पुंसां रघुपतिपदैरङ्कितं मेखलासु ।**

यत् गर्जितं कर्तृ महोम् उच्छ्वासान्धान् उद्भूतक्रन्दितकान्, क्रन्दन्याश्च शिलोच्चा व्यादिति शब्दार्णवे । अतएव अवन्ध्यां सफलां कर्तुं प्रभवति शक्नोति शिलोच्चाणां भाविशस्यसम्पत्तिसूचकत्वात् इति भावः । तदुक्तं निमित्तनिदानं, कालाभ्रयोगादुदिताः शिलोच्चाः सम्पन्नशस्यां कथयन्ति धात्रीमिति । तत् श्रवणसुभगं श्रोत्रसुखं लोकस्येति शेषः ते तव गर्जितं श्रुत्वा मानसोत्काः मानसे सरसि उन्मनसः उत्सुकाः इति यावत्, उत्क उन्मना इति निपातात्साधु । कालान्तरे मानसस्य हिमदुष्टत्वात् हिमस्य च हंसानां रोगहेतुत्वात् अन्यत्र गता हंसाः पुनर्वर्षासु मानसमेव गच्छन्तीति प्रसिद्धिः । विसकिसलयानां मृणालाग्राणां छेदैः शकलैः पाथेयवन्तः पथि साधु पाथेयं, पथ्यतिथिवसतिभ्यष्ठक् । पाथेयवन्तः मृणालाग्रशकलसम्पन्नवन्तः इत्यर्थः राजहंसाः हंसमिथुनानि, राजहंसास्तु रक्तशिरोभिदाः पिता इत्यमरः । नभसि व्योम्न भवतः तव आकैलासात् कैलासाभ्यर्णं यावत् एतत् सहायाः सयात्राः, सहार्थेन तृतीया सहस्य सः । सम्पत्स्यन्ते भविष्यन्ति ॥ ११ ॥

आपृच्छस्वेति तं [illegible] खि-

**काले काले भवति भवतो यस्य संयोगमेत्य**
**स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो वाष्पमुष्णम्॥१२**
**मार्गं तावच्छृणु कथयतस्त्वत्प्रयाणानुरूपं**
**सन्देशं मे तदनु जलद! श्रोष्यसि श्रोत्रपेयम्।**
**खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र**
**क्षीणः क्षीणः परिलघु पयः स्रोतसां चोपयुज्य॥१३**

व्यष्टजिति समासान्तः। तुङ्गम् उन्नतं पुंसां वन्द्यः मुरारा-
तीयैः रघुपतिपदैः रामपादन्यासैः मेखलासु कटकेषु, अथ
मेखला श्रोणिस्थानेऽद्रिकटके काञ्चिबन्धेभबन्धने इति
यादवः। अङ्कितं चिह्नितम् इत्यं सत्त्वात् महत्त्वात्
पवित्रत्वाच्च सम्भावनार्हम् अमुं शैलं चित्रकूटाद्रिमालिङ्ग्या-
पृच्छस्व साधो यामीति आमन्त्रणेन सभाजय, आमन्त्रण-
सभाजने आप्रच्छनमित्यमरः। आङि नुप्रच्छोरित्यात्मने-
पदम। सौख्यं निर्वाहयति काले इति। काले काले
प्रतिप्रावृट्कालं सुहृत्समागमनकालञ्च कालशब्देन उच्यते।
वीप्सायां द्विरुक्तिः। भवतः सयोगं सम्पर्कम् एत्य चिरविरह-
जम् उष्णं वाष्पम् उष्माणं नेत्रजलञ्च, वाष्पो नेत्रजलोष्मणो-
रिति विश्वः। मुञ्चतो यस्य शैलस्य स्नेहव्यक्तिः प्रेमावि-
र्भावो भवति स्निग्धानां हि चिरविरहसङ्गतानां वाष्प-
पातो भवति इति भावः॥१२॥

सम्प्रति मार्गं कथयति, मार्गमिति। हे जलद! ता-
वत् इदानीं कथयतो मत्तः इति शेषः त्वत्प्रयाणस्य
अनुरूपम् अनुकूलं मार्गम् श्रध्वानं, मार्गो ऽध्वपदे मार्गे

अद्रेः शृङ्गं हरति पवनः किंस्विदित्युन्मुखीभि-
र्दृष्टोत्साहः चकितचकितं मुग्धसिद्धाङ्गनाभिः ।
सौम्यच्यैन्वषणेऽध्वनीति यादवः । शृणु । तदनु मार्गश्रव-
णानन्तरं श्रोत्राभ्यां पेयं पानार्हेम अतितृष्णया श्रोतव्यम
इत्यर्थः पेयग्रहणात् सन्देशस्य अमृतमाम्यं गम्यते । मे
सन्देशं वाचिकं, सन्देशवाक् वाचिकं स्यादित्यमरः ।
श्रोष्यसि । यत्र मार्गे खिन्नः खिन्नः अभीक्ष्णं क्षीणबलः
सन, नित्यवीप्सयोरिति नित्यार्थे द्विर्भावः । शिखरिषु
पर्वतेषु पदं न्यस्य निक्षिप्य पुनर्बललाभार्थं क्वचित् विश्रम्य
इत्यर्थः क्षीणः क्षीणः अभीक्ष्णं क्षयाङ्गः सन, अत्रापि क्षद-
न्तत्वात् पूर्ववत् द्विरुक्तिः । स्रोतसां परिलघु गुरुत्वदोष-
रहितम् उपलास्फालनखेदितत्वात् पथ्यम इत्यर्थः तथा च
बाह्वटः, उपलास्फालनक्षेपविच्छेदैः खेदितोदकाः । हिम-
वन्मलयोद्भूताः पथ्या नद्यो भवन्त्यमूरिति । पयः पानी-
यम् उपयुज्य शरीरपोषणार्थम् अभ्यवहृत्य च गन्तासि
गमिष्यसि, गमेर्लुट् ॥१२॥

अद्रेरिति । पवनो वायुः अद्रेः चित्रकूटस्य शृङ्गं
हरति किंस्वित् [किंस्विच्छब्दो वितर्कार्थे चादिषु
पठितः] । इति शङ्कया उन्मुखीभिः उन्नतमुखीभिः
[स्वाङ्गाच्चोपसर्जनादसंयोगोपधादिति ङीप् ] । मुग्धाभिः
मूढ़ाभिः [मुग्धः सुन्दरमूढ़योरित्यमरः] । सिद्धानां
देवयोनिविशेषाणाम् अङ्गनाभिः चकितचकितं चकित-
प्रकारं यथा तथा [प्रकारे गुणवचनस्येति द्विर्भावः] ।

स्थानादस्मात् सरसनिचुलादुत्पतोदङ्मुखः खं
दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान्१४

दृष्टोत्साहः दृष्टोद्योग. सन सरसाः आर्द्राः निचुलाः स्थल-
वेतसाः यस्मिन् तस्मात् स्थानात् स्थानाद् आवसिद् स्थानिचुलः
स्थलवेतसे इति शब्दार्णवे । अस्मात् स्थानात् स्थानात् पथि
पथि नभोमार्गे दिङ्नागानां दिग्हस्तिनां स्थूलाः ये हस्ताः
कराः तेषाम् अवलेपान् आक्षेपान् परिहरन् हस्तो नक्ष-
त्रभेदे स्यात्करिभकरयोरपीति विश्वः । उदङ्मुखः सन् अल-
कायाः उदीच्यत्वात् इत्यागयः खम् आकाशम् उत्पत
उड्डच्छ । अत्र इदमपि अर्थान्तरं ध्वनयति, रसिको निचुलो
नाम महाकविः कालिदासस्य सहाध्यायः परापादितानां
कालिदासप्रबन्धदूषणानां परिहर्त्ता यस्मिन् स्थाने तस्मात्
स्थानात् उदङ्मुखो निर्दोषत्वात उन्नतमुखः सन् पथि
सारस्वतमार्गे दिङ्नागानां प्रज्ञायां बहुवचनं दिङ्नागा-
चार्य्यस्य कालिदासप्रतिपक्षस्य हस्तावलेपान् हस्तविन्या-
सपूर्वकाणि दूषणानि परिहरन् [अवलेपस्तु गर्वे स्याक्षेपने
दूषणेऽपि चेति विश्वः । अद्रेः अद्रिकल्पस्य दिङ्नागा-
चार्य्यस्य शृङ्गं प्राधान्यम् । [शृङ्गं प्राधान्यसान्वोश्चेत्यमरः] ।
हरतीति हेतुना सिद्धैः सारस्वतसिद्धैः महाकविभिः अङ्गना-
भिश्च दृष्टोत्साहः सन् खम् उत्पत उच्चैर्भव इति स्वप्रबन्धम्
आत्मानं वा प्रति कवेरुक्तिरिति । संसर्गतो दोषगुणा
भवन्तीत्येतन्मृषा येन जलाश्रयेऽपि । स्थित्वानुकूलं निचुल-

रत्नच्छायाव्यतिकर इव प्रेक्ष्यमेतत् पुरस्ता-
द्वल्मीकाग्रात्प्रभवति धनुःखण्डमाखण्डलस्य ।
येन श्यामं वपुरतितरां कान्तिमापत्स्यते ते
बर्हेणेव स्फुरितरुचिना गोपवेशस्य विष्णोः ॥१५॥
त्वय्यायत्तं कृषिफलमिति भ्रूविलासानभिज्ञैः
प्रीतिस्निग्धैर्जनपदबधूलोचनैः पीयमानः ।
सद्यः सीरोत्कषणसुरभि क्षेत्रमारुह्य मालं
किञ्चित्पश्चाद्व्रज लघुगतिर्भूय एवोत्तरेण ॥१६॥

श्लक्ष्णमाखण्डलधनुरित्यनेन स्निग्धत्वगुणात् तस्य श्लक्ष्णत्वमुक्तम् ॥१४॥

रत्नेति । रत्नच्छायाना पद्मरागादिमणिप्रभाणां व्यतिकरो मिश्रणम् इव प्रेक्ष्यं दर्शनीयम् आखण्डलस्य इन्द्रस्य एतत् धनुःखण्डम् एतदिति हस्तेन निर्देशः । पुरस्तात् अग्रे वल्मीकाग्रात् वामनूरविवरात् वामनूरस्थ नाकुस्थ वल्मीकं पुनपुसकमिति अमरः । प्रभवति च विभवति येन धनुःखण्डेन ते तव श्यामं वपुः स्फुरितरुचिना उज्ज्वलकान्तिना बर्हेण पिच्छेन [ पिच्छबर्हं पुमांसं इत्यमरः ] । गोपवेशस्य विष्णोः गोपालस्य कृष्णस्य श्यामं वपुरिव अतितरां कान्तिं शोभामापत्स्यते ॥

त्वयीति । कृषः फलं कृषिफलं शस्यं तदायत्तं तदाधारं तद्विषयकं यत् तत्तथोक्तं तस्मिन् तथाविधायां सस्यसमृद्धौ सत्यां प्रीतिस्निग्धैः प्रीत्या स्निग्धानि निष्ण आयत्त इत्यत

त्वामासारप्रशमितवनोपप्लवं साधु मूर्ध्ना
वक्ष्यत्यध्वश्रमपरिगतं सानुमानाम्रकूटः ।
न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय
प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः ।१७

स्निग्धप्रेमार्द्रैः इत्यर्थः । भ्रूविलासानां भ्रूविकाराणाम अनभिज्ञैः पामरत्वादिति शेषः । जनपदवधूनां पल्लीयौवितानां लोचनैः पाश्यमानः सादरं वीक्ष्यमाणः सन् मालक्ष्यं चैवं शैलोऽयम् उन्नत इत्यर्थः । मालमुन्नतभूतलमित्युत्पलः । सद्यः तत्क्षणमेव कीरैः हलैः उत्कषणेन कर्षणेन सुरभि घ्राणतर्पणं यथा तथा आकृष्य तत्र अभिवृष्य इत्यर्थः । सुरभिर्घ्राणतर्पण इत्यमरः । किञ्चित पश्चात् लघुगतिः तत्र निर्दृष्टत्वात् क्षिप्रगमनः सन् लघु क्षिप्रमरं द्रुतमित्यमरः । भूय. पुनरपि उत्तरत्रैव उत्तरमार्गेणैव व्रज गच्छ । [ प्रकृत्यादिभ्य उपसंख्यानमिति द्वितीया ] । यथा कश्चित् बहुवल्लभः पतिः कुत्रचित् चेति कलत्रं गूढं विहृत्य [ चेतं शरीरं केदारं सिञ्चयानकलत्रकर्षारिति विश्वः ] । दाक्षिण्यक्षुभ्यदात् नीचमार्गेण निर्गत्य पुनः सर्वाध्वञ्च सञ्चरति तद्वदिति ध्वनिः ॥१६॥

त्वामिति । आम्राः चूताः कूटेषु शिखरेषु यस्य सः आम्रकूटो नाम सानुमान् पर्वतः [ आम्रश्चूतो रसालोऽसाविति, कूटोऽस्त्री शिखरं शृङ्गमिति च अमरः ] । आसारो धाराहृष्टिः [ धारासम्पात आसार इत्यमरः ] । तेन प्रशमितो वनोपप्लवो दावाग्निर्येन तं कृतोपकारम्

**क्रन्नोपान्तः परिणतफलद्योतिभिः काननाम्रै-**
**स्त्वय्यारूढे शिखरमचलः स्निग्धवेणीसवर्णे ।**
**नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्थां**
**मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः १८**

इत्यर्द्धं. अध्वश्रमेण परिगतव्यायामत्वात् साधु सम्यक् मूर्धा वर्त्तयति वोढा । धल्लिट् । तथाहि क्षुद्रः अपणोऽपि क्षणी स्वार्द्रे कार्ये मृदुः दुर्लभार्द्रः । समवाय समवयणाय मित्रे सुहृदि । अथ मित्रं मया सुहृदित्यमरः ।। प्राप्ते आगते सति प्रथमसुकृतापेक्षया पूर्वोपकारपर्य्यालोचनया विमुखो न भवति यः तथा तेन प्रकारेण उच्चैः उन्नतः सः आम्रकूटः किं पुनः विमुखो न भवतीति किमु वक्तव्यम् इत्यर्थः । एतेन प्रथमावसथे मौख्यलाभात् तं कार्य्यसिद्धिरस्तीति सूचितम । तदुक्तं निमित्तनिदाने, प्रथमावसथे यस्य मौख्यं तस्याखिलेऽध्वनि । शिवं भवति यात्रायामन्यथा त्वशुभं ध्रुवमिति ॥१७॥

क्रन्नेति । हे मेघ । परिणतैः परिपक्वैः फलैः द्योतन्ते इति तथोक्तैः आषाढे वनचूता फलन्ति पच्यन्ते च मेघवातेन इत्याशयः । काननाम्रैः वनचूतैः क्रन्नोपान्तः आहतपार्श्वैः अचलः आम्रकूटाद्रिः स्निग्धवेणीसवर्णे मसृणकेशबन्धच्छाये श्यामवर्णे इत्यर्थः [ एषा तु केशबन्धे जलस्रुताविति यादवः ]। त्वयि शिखरं मृङ्गम् आरूढे सति [ यस्य च भावेन भावलक्षणमिति सप्तमी ]। मध्ये श्यामः शेषे मध्यात् अन्यत्र विस्तारे परितः पाण्डुः हरिणः [ हरिणः

स्थित्वा तस्मिन् वनचरवधूभुक्तकुञ्जे मुहूर्त्त
तोयोत्सर्गद्रुततरगतिः तत्परं वर्त्म तीर्णः ।
रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णां
भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य ॥१९॥

पाण्डुः पाण्डुरित्यमरः । भुवः स्तनः इव अमरमिथुनानां रिरंसायाम् अति याव पंक्तणीयां दर्शनीयान् अवश्य ... भवति । मिथुनग्रहणं कामिनामेव स्तनविन उत्प्रेक्षा सम्भवतीति ज्ञापनार्थं । यथा परिश्रान्तः कश्चित् कामी कामिनीनां कुचकरभे विश्रान्तः सन् स्वपिति तद्वत् भवानपि भूयो नायिकायाः स्तने इति ध्वनिः ॥१८॥

स्थित्वेति । हे मेघ । वने चरन्ति इति वनचराः [ तत्पुरुषे क्षति बहुलमिति बहुलग्रहणात् कुः भवति ] । तेषां वधूभिः स्त्रीभिः कृष्टाः लतागृहाः यत्र तस्मिन् [ निकुञ्जकुञ्जो वा क्लीबे लतादिपिहितोदरं इत्यमरः ] तत्र ते नयनविनोदोऽपि इत्यर्थः तस्मिन् आम्रकूटे मुहूर्त्तम् अल्पकाल न तु चिरं स्वकार्य्यविरोधात् इति भावः [ मुहूर्त्तमल्पकाले स्याद् वटिकाद्वितयेऽपि चेति शब्दार्णवे ] । स्थित्वा विश्रम्य तोयोत्सर्गेण लघुभारित्युक्तवर्षणेन द्रुततरगतिः लाघवात् हेतोः अतिक्षिप्रगमनः सन् तस्मात् आम्रकूटात् परम् अनन्तरं तत्परं वर्त्म मार्गं तीर्णः अतिक्रान्तः उपलैः पाषाणैः विषमे निम्नोन्नते अद्रेः पार्श्वे प्रत्यन्तपर्वते पादाः प्रत्यन्तपर्वता इत्यमरः । विशीर्णां

तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टि-
र्जम्बूकुञ्जप्रतिहतरयं तोयमादाय गच्छेः।
अन्तःसारं घन! तुलयितुं नानिलः शक्ष्यति त्वां
रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय ॥२०

समन्ततो जिघ्रमराग एतेन कस्यांचित कामुक्या. प्रियतम-
चरणापातोऽपि सूच्यते एवा नर्मदां रेवा तु नर्मदा सोमो-
द्भवा मेखलाश्च न्यतित्यमरः। गजस्य अङ्गे शरीरे भक्तयो
रचना रम्या इति यावत। भक्तिर्विषेवणे भागे रचनायां
मितिशब्दाभ्यां। नाना छेद भक्तिभिर्विरचितां भूतिं
शृङ्गारमिव भस्मितमिव वा, भूतिर्मातङ्ग शृङ्गारं जातौ
भस्मनि सम्पदादि विश्वः]। दृक्ष्यसि अयमपि महांस्ते
नयनकौतुकलाभ इति भावः॥१९।

तस्या इति! हे मेघ! वान्तवृष्टिः उद्गीर्णवर्षः सन्
कृतवमनश्च व्यज्यते। तिक्तैः सुगन्धिभिः तिक्तरसवद्भिश्च
[तिक्तो रसे सुगन्धौ चेति विश्वः] वनगजमदैः वासितं सुर-
भित भावितञ्च, हिमवद्विन्ध्यमलया गजाना प्रभव वाः इति
विन्ध्यस्य गजप्रभवत्वादिति भावः। जम्बूकुञ्जैः प्रतिहतरयं
प्रतिबद्धवेगं सुखपेयम् इत्यर्थः एतेन लघुत्वं कषायभावना
च व्यज्यते। तस्याः रेवायाः तोयम आदाय गच्छेः व्रज।
हे घन। मेघ। अन्तः सारो बलं यस्य त त्वाम् अनिलः
आकाशवायुः शरीरस्थश्च गम्यते तुलयितुं न शक्ष्यति शक्तो
न भविष्यति। तथाहि रिक्तः अन्तःसारशून्यः सर्वोऽपि लघुः
भवति प्रकम्प्यो भवति इत्यर्थः, पूर्णता सारवत्ता गौरवाय

**नीपं दृष्ट्वा हरितकपिशं केशरैरर्द्धरूढै-**
**रा विर्भूतप्रथमसुकुला: कन्दलीश्चानुकच्छम् ।**
**जग्ध्वारण्येष्वधिकसुरभिं गन्धमाघ्राय चोर्व्या:**
**सारङ्गास्ते जललवमुच: सूचयिष्यन्ति मार्गम्॥२१**

अप्रकम्प्यत्वाय भवति इत्यर्थ: । अयमत्र ध्वनि:, आदौ वमनशोधितस्य पुम: पश्चात् निरूहणाय लघुतिक्तकषायाम्बुपानात् लङ्घनस्य वातप्रकोपो न स्यादिति यथाह वाग्भट:, कषायाश्चानिलास्तस्य विशुद्धा श्लेष्मणो हिता: । किमु तिक्ता: कषाया वा ये निसर्गात्कफापहा: । क्रतशुद्धे: क्रमात्पीतामृताद्य. पथ्यभोजिन: । वातादिभिर्न बाधा स्यादिन्द्रियाणि च योगिन इति ॥२१॥

नीपमिति । सारङ्गा: मदकला: कुरङ्गा: वा सारङ्गस्वातके मृगे कुरङ्गे च मदकल इति विश्व: । अर्द्धरूढै: एकदेशोद्गतै. केसरै: किञ्जल्कै: हरित पालाश्वर्णं पालाशं हरितो हार्दित्यमर: । कपिशं श्याव-वर्णं श्याव: श्यावकपिश इत्यमर: हरितश्च सत कपिशं च हरितकपिशं [वर्णौ वर्णेनेति समास:] । नीपं स्थलकदम्बकुसुमम् [अथ स्थलकदम्बकं नीप: स्यादिति शब्दार्णवे] दृष्ट्वा संप्रेक्ष्य विदित्वा इति यावत् तथा कच्छेषु अनूपेषु अनुकच्छम् अव्ययं विभक्त्यर्थेऽव्ययीभाव: । जलप्रायमनूपं स्यात् पुंसि कच्छस्तथाविध: इत्यमर:] । *आविर्भूता: प्रथमोत्पन्ना: मुकुला: यासां ता: कन्दली: भूमिकदली: द्रोणपर्णी स्निग्धकन्दा कन्दली

**अम्भोविन्दग्रहणचतुरांश्चातकान् वीक्ष्यमाणाः**
**श्रेणीभूताः परिगणनया निर्दिशन्तो बलाकाः ।**
**त्वामासाद्य स्तनितसमये मानयिष्यन्ति सिद्धाः**
**सोत्कम्पानि प्रियसहचरीसम्भ्रमालिङ्गितानि ।२२**

भूकदम्बानीति सार्धम् । त्वामद्रिं वा अद्रौ जलधिरिति जलाशयः । अत्रैव पाठक्रमेण प्रीणनपर्यन्तं दृश्यानुरोधेनेतिपाठे दृश्यानुरोधविशेषणम् अयवमात कन्दलीश्च दृष्ट्वेत्यन्वयो दृश्यः । तस्याः भूमेः गन्धमाघ्राय जललवमुचो मेघस्य ते तव मार्गं सूचयिष्यन्ति अनुमापयिष्यन्ति यत्र यत्र दृष्टिकार्यं नोपकुसुमादिकं दृश्यते तत्र तत्र त्वया वृष्टमित्यनुमीयत इत्यर्थः ॥२१॥

अम्भ इति । प्रक्षिप्तमपि व्याख्यायत । अम्भोविन्दनां वर्षोदबिन्दूनां ग्रहणे सर्वसहापतितमम्बु न चातकस्य हितमिति माभूत् भूस्पृष्टोदकस्य तृषा रोगहेतुत्वादन्तराले एव स्तोकान् चतुरांश्चातकान वीक्ष्यमाणाः कौतुकात् पश्यन्तः श्रेणीभूताः बद्धपङ्क्तीः । । अभूततद्भावे चिः । बलाकाः वकपङ्क्तीः परिगणनया एका द्वे तिस्र इति संख्यानेन निर्देशन्तः हस्तेन दर्शयन्तः सिद्धाः स्तनितसमये त्वद्गर्जितकाले सोत्कम्पानि उत्कम्पपूर्वकाणि प्रियसहचरीणां सम्भ्रमेणालिङ्गितानि आसाद्य स्वयंग्रहणाश्लेषसुखमनुभूयेत्यर्थः । त्वां मानयिष्यन्ति त्वन्निमित्तत्वात् सुखलाभस्येति भावः ।२२॥

उत्पश्यामि द्रुतमपि सखे! मत्प्रियार्थं यियासोः
कालक्षेपं ककुभसुरभौ पर्वते पर्वते ते।
शुक्लापाङ्गैः सजलनयनैः स्वागतीकृत्य केकाः
प्रत्युद्यातः कथमपि भवान् गन्तुमाशु व्यवस्येत्२३

उत्पश्यामीति। हे सखे मित्र मत्प्रियार्थं मदीयप्रियायै यक्षा नया द्रुतं क्षिप्रं यातुं गन्तुमहं त्वामिक्षमाणः। यियासोर्यातेः सन्नन्तात्प्रत्ययः। ते तव ककुभः कुटजकुसुमैः सुरभौ सुगन्धिनि ककुभः कुटजेऽर्जुने इति मेदिनी पर्वते पर्वते प्रतिपर्वतमित्यर्थः वीप्सायां द्विर्वचनं। कालक्षेपं कालविलम्बमुपेक्षा विलम्बं निदाघार्तिति विश्वः। उत्पश्यामि उत्प्रेक्षे। विलम्बितुं दयितजनआगमन प्रार्थयति शक्नोति। सजलानि सानन्दाश्रूणि नयनानि यैः शुक्लापाङ्गैः मयूरैः। अत्रापि वर्णिनो वर्हा शुक्लापाङ्गाः शिखावन्त इति यादवः।] केका स्वकीयां केका वाणी मयूरस्येत्यमरः। स्वागतीकृत्य स्वागतवचनमुक्त्वा प्रत्युद्यातः कृतातिथ्यः इत्यर्थः भवान् कथमपि यथाकथञ्चित् आशु गन्तुं व्यवस्येत् उद्युञ्जीत प्रयत्नं कुर्यात्। शेषे प्रथम इति प्रथमपुरुषः शेषात् कर्तरि वा युष्मदस्मच्छब्दयोरेकात्] स्वागतीकृत्य केका इत्यत्र केकाभु भाषिष्यमाणस्य स्वागतवचनस्य प्रकृतप्रत्युद्गमनौचित्यात् तत्पर्यायमालङ्कारं तदुक्तम् अलङ्कारसर्वस्वे, आक्षेपस्य प्रकृतोपयोगित्वमर्थात् लाभ इति २३

पाण्डुच्छायोपवनवृतयः केतकैः सूचिभिन्नै-
र्नीड़ारम्भैर्गृहबलिभुजामाकुलग्रामचैत्याः।
त्वय्यासन्ने परिणतफलश्यामजम्बूवनान्ताः
सम्पत्स्यन्ते कतिपयदिनस्थायिहंसा दशार्णाः॥२४
तेषां दिक्षु प्रथितविदिशालक्षणां राजधानीं

पाण्डुच्छायेति। हे सौम्य! त्वयि आसन्ने सन्निकृष्टे सति दशार्णाः नाम जनपदाः सूचिभिन्नैः सूचिषु मुकुलाग्रेषु भिन्नैः विकसितैः [मुकुलाग्रेषु सूचिः स्यादिति शब्दार्णवे।] केतकैः केतकीकुसुमैः पाण्डुच्छायाः हरिणवर्णाः उपवनानां वृतयः कण्टकशाखावरणाः येषु ते तथोक्ताः प्राकारो वरणः सालः प्राचीरं प्रान्तरो वृतिरित्यमरः। तथा गृहबलिभुजां काकादिग्रामपक्षिणां नीड़ारम्भैः कुलायनिर्माणैः [कुलायो नीड़मस्त्रियामित्यमरः।] चित्ताया इमानि चैत्यानि रथ्याबुद्धाः [चैत्यमायतने बुद्धबन्धौ चोद्दिश्यपादपे इति विश्वः] आकुलानि सङ्कीर्णानि ग्रामेषु चैत्यानि येषु ते तथोक्ताः तथा परिणतैः पक्वैः फलैः श्यामानि यानि जम्बूवनानि तैः अन्ताः रम्याः [ऋतावृतसिते रम्ये समाप्तावन्त इष्यते इति शब्दार्णवे।] तथा कतिपयेषु एव दिनेषु स्थायिना हंसाः येषु ते तथोक्ताः एवंविधाः सम्पत्स्यन्ते भविष्यन्ति। [पोटायुवतिस्तोककतिपयेत्यादिना कतिपयशब्दस्योत्तरपदत्वेऽपि न तच्छब्दस्योत्तरत्वमस्ति अस्य शास्त्रस्य प्रायिकत्वात्] ॥२४॥

तेषामिति। दिक्षु प्रथितं प्रसिद्धं विदिशा इति लक्षणं

गत्वा सद्यः फलमविकलं कामुकत्वस्य लब्धा ।
तीरोपान्तस्तनितसुभगं पास्यसि स्वादु यस्मात्
सभ्रूभङ्गं मुखमिव पयो वेत्रवत्याश्चलोर्मि ॥२५॥
नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतो-
स्त्वत्सम्पर्कात् पुलकितमिव प्रौढपुष्पैः कदम्बैः ।

[illegible] यं यस्य [illegible] नाम [illegible] ति यानी [illegible] लाञ्छनयोश्चिति [illegible] यानी [illegible] लक्षणा पक्षे समन्तात् [illegible] समारो. । ता प्रधानजगरीं प्रधानजगरी गत्वा राजधानीति ऊर्ध्वं इति शब्दार्णवे । विलासी कामुकः कामी लोभी रतिलम्पट इति शब्दार्णवे । ] अविकलं सकलं फलं मनोज्ञं लब्धा लप्स्यते त्वया इति शेषः । [ कर्मणि लुट् । ] यस्मात् स्वादु मधुरं पयो. जलं यत्र तत् चलोर्मि तरङ्गित वेत्रवत्याः नाम नद्याः पयः सभ्रूभङ्गं भ्रूकुटियुतं दयनपोड़या इति भावः मुखम् इव अधरम् इव इत्यर्थः तीरोपान्ते तटप्रान्ते यत् स्तनितं गर्जितं तेन सुभगं [यथा स्तनितशब्देन मण्डितमपि भ्रन्यते ऊर्ध्वमुच्चलितकण्ठनासिकं हुङ्कृतं स्तनितमल्पघोष-वदिति लक्षणात् । ] पास्यसि [पिबतेर्लृट् । ] कामिनाम-धरास्वादः सुरतादतिरिच्यते इति भावः ॥२५॥

नीचैरिति । हे मेघ ! तत्र विदिशासमीपे

यः परिमलोद्गारिभिर्नागराणा-
मुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि ॥२६॥

विश्रामः स्वेदापनयः [ भावार्थे घञ्प्रत्ययः ]। तस्य हेतोः विश्रामकारणात् विश्रामार्थम् इत्यर्थः [ षष्ठी हेत्-प्रयोगे इति षष्ठी विश्रामेत्यत्र नोदात्तोपदेशस्य मान्त-स्यानाचमेरिति पाणिनीये वृद्धिप्रतिषेधेऽपि विश्रामो रति चन्द्रव्याकरणे विवल्पेन वृद्धिविधानाद्रूपसिद्धिः। ] प्रौढपुष्पः प्रवृद्धकुसुमः कदम्बः नीपवृक्षैः त्वत्सम्पर्कात् तव सङ्गात् पुलकाः अस्य जाता. पुलकितमिव सञ्जातपुलक-मिव स्थितम [ तारकादित्वादितचप्रत्ययः ]। नीचैरिति आख्या यस्य तं नीचैराख्यं गिरिं अधिवसेः गिरौ वसेः प्रत्ययः [ उपान्वध्याङ् वस इति वार्त्तिकम्। ] यो नीचै-र्गिरिः पण्याः क्रेयाः स्त्रियः पण्यस्त्रियः वेश्याः [ वारस्त्री गणिका वेश्या परपुंस्को रूपजीविनीति शब्दार्णवे ]। तासां रतिषु यः परिमलो गन्धविशेषः [ विमर्दोत्थे परि-मलो गन्धे जनमनोहरे इत्यमरः ]। तम् उद्गिरन्ति आवि-र्भावयन्ति इति तथोक्तानि तैः शिलावेश्मभिः कन्दरैः नाग-राणां पौराणाम् उद्दामानि उत्कटानि यौवनानि प्रथयति प्रकटयति। उत्कटयौवनाः क्वचित् अनुरक्ताः वाराङ्गना विस्रम्भविहारकाङ्क्षिणो मातादिभयात् निशीथसमये कञ्चन विविक्तं देशम् आश्रित्य रमयन्ति, तत्रात्त बहुलम-स्तीति प्रसिद्धिः। अत्र उद्गारशब्दो गौणार्थत्वात् न जगुप्सावहः प्रत्युत काव्यस्य अतिशोभाकर एव। तदुक्तं

विश्रान्तः सन् व्रज वननदीतीरजातानि सिञ्चन्
उद्यानानां नवजलकणैर्यूथिकाजालकानि ।
गण्डस्वेदापनयनरुजाक्रान्तकर्णोत्पलानां
छायादानात क्षणपरिचितः पुष्पलावीमुखानां२७

दक्षिणा, निम्नगा नीचैर्गिरौ ... गामवन्तिव्यवायवयम ।
अतिसुन्दरमन्यत्र गाम्भ्यकल. विगाहा इति ॥२६॥

विश्रान्त इति । विश्रान्तः सन तत्र नीचैर्गिरौ विनी-
लाध्वश्रमः सन अथ विश्रान्तिरनन्तर वने अरण्ये याः नद्यः
तासां तीरेषु जातानि स्वयं रूढानि अकृत्रिमाणि इत्यर्थः
|नदनदीति पाठे पुमान स्त्रियेलोकग्रेपो दर्वार । उद्या-
नानाम आरामाणां सम्बन्धीनि यूथिकाजालकानि माग-
धीकुसममुकुलानि 'अथ मागधो गणिका यूथिकेत्यमरः ।
कोरकजालकलिकाकुड्मलमुकुलानि तुल्यानीति हलायुधः।।
नवजलकणैः सिञ्चन आर्द्रीकुर्वन अत्र सिञ्चतेरार्द्रीकरणा-
र्थत्वात् द्रवद्रव्यस्य करणत्वं. यत्र तु चरणम अर्थः तत्र द्र-
व्यस्य कर्मत्वम यथा, रतः सिक्ता कुमारीषु, मुखानीषच्च-
न्तमिवामृतं त्वचोत्येवमादि । एवं किरतीत्यादीनामपि
"रज. किरति मारुत." इवाकिरन् वयोद्वद्वास्तं लाजैः पौर-
योषितः" इत्यादिष्वर्थभेदाश्रयण रजोलाजादीनां कर्म-
त्वकरणत्वे गमयितव्ये ।। तथा गण्डयोः कपोलयोः
स्वेदस्य अपनयनेन प्रमार्जनेन या रुजा पीड़ा [ भिदादि-
त्वादङ्प्रत्ययः ।। तया क्लान्तानि म्लानानि कर्णोत्पलानि
येषां तेषां पुष्पाणि लुनन्तीति पुष्पलाव्यः पुष्पावचायिकाः

वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तरायां
सौधोत्सङ्गप्रणयविमुखो मास्म भूरुज्जयिन्याः
विद्युद्दामस्फुरितचकितैस्तत्र पौराङ्गनानां
लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि२८

[illegible] उत्तराशाम उदीची दिशं प्रति प्रस्थितस्य भवत पन्था उज्जयिनीमार्गः वक्रो यदपि दूरो यद्यपि उत्तरवाहिन्या. निर्विन्ध्याया: प्राग्भागं क्रियते [illegible] विन्ध्यस्य उज्जयिनी, उत्तरपथस्तु निर्विन्ध्याया: पाश्चमभाग [illegible] तथापि उज्जयिन्या. विशालानगरस्य विशालोज्जयिन्योः समेत्युत्पत्ति. । सौधानाम् उत्सङ्गेषु उपरिभागेषु, तस्य परिचय. । प्रणयः स्यात् परिचये याञ्चा सा [illegible] इति यादवः ] तस्य विमुख. पराङ्मुखो मा भू [illegible] न भव इत्यर्थः सौत्र लङ् चेति चकारादाशीर्लिङ्योश्च [illegible] । न माङ्योगे इत्यडागमप्रतिषेधः । तत्र उत्क्षिप्य विद्युद्दाम्नां विद्युल्लतानां स्फुरितेभ्य. स्फुरणेभ्यः चकित. भीतैः लोलापाङ्गे. चञ्चलकटाक्षे

वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणाया:
संसर्पन्त्या: स्खलितसुभगं दर्शितावर्त्तनाभे: ।
निर्विन्ध्याया: पथि भव रसाभ्यन्तर: सन्निपत्य
स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु ॥२९

पौराङ्गनानां लोचनै: न रमसे यदि तर्हि त्व वञ्चित:
प्रतारित: असि जन्मैफल्यं भवेत् इत्यर्थ: ॥२८॥

सम्प्रत्युज्जयिनीं गच्छतस्तस्य मध्येमार्गं निर्विन्ध्या-
सम्बन्धमाह, वीचीति । हे सखे । पथि उज्जयिनीपथे
वीचिक्षोभेण तरङ्गचलनेन स्तनिताना मुखराणाम् कत्तरि
क: ] विहगानां हंसानां श्रेणि: पङ्क्तिरेव काञ्चीगुणो
यस्या: तस्या: स्खलितेन उपलस्खलनेन मदस्खलितेन च
सुभगं यथा तथा संसर्पन्त्या: प्रवहन्त्या: गच्छन्त्याश्च तथा
दर्शिता प्रकटिता आवर्त्ता: अम्भसां भ्रम एव नाभिर्यया
[स्यादावर्त्तोऽम्भसां भ्रम इत्यमर: ] । निष्क्रान्ता विन्ध्यात्
निर्विन्ध्या नाम नदी [ निरादय: क्रान्ताद्यर्थे पञ्चम्येति
समास: । द्विगुप्राप्तापन्नेत्यादिना परवल्लिङ्गताप्रतिषेध: ] ।
तस्या: नद्या: सन्निपत्य सङ्गत्य रसो जलम् अभ्यन्तरे यस्य
स: अन्यत्र रसेन शृङ्गारेण अभ्यन्तर: अन्तरङ्गो भव सर्वथा
तस्या: रसमनुभवेत्यर्थ: [ शृङ्गारादौ जले वीर्य्ये सुवर्णे
विषशुक्रयो: । तिक्तादावमृते चैव निर्यासे पारदे ध्वनौ ।
आस्वादे च रसं प्राहुरिति शब्दार्णवे ] । ननु तत्प्रार्थना-
स्मरेण कथं तत्रानुभावो युज्यते इत्यत आह, स्त्रीणां
प्रियेषु विभ्रमो विलास एवाद्यं प्रणयवचनं प्रार्थना-

वेणीभूतप्रतनुसलिलासावतीतस्य सिन्धुः
पाण्डुच्छाया तटरुहतरुभ्रंशिभिर्जीर्णपर्णैः।
सौभाग्यं ते सुभग विरहावस्थया व्यञ्जयन्ती
कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः॥३०

वाक्य हि स्त्रीणामेष स्वभावो यत् विलासेरेव रागप्रकाशनं न तु कथनत इति। विभ्रमस्यैव नाभिसन्दर्शनादिः उक्त एव ।२९॥

निर्विन्ध्याया विरहावस्थां वर्णयन तन्निराकरणं प्रार्थयते, वेणीति। अवेणी वेणीभूतं वेणाकार प्रतनु क्षीणञ्च सलिलं यस्याः सा तथोक्ता वेणीभूतक्षीणधारा इति च ध्वन्यते। रुहन्ति इति रुहाः [इगुपधलक्षणः कः]। तटयोः रुहाः ये तरवः तेभ्यः भ्रश्यन्ति इति तथोक्तैः जीर्णपर्णैः शुष्कपत्रैः पाण्डुच्छाया पाण्डुवर्णा अत एव हे सुभग! विरहावस्थया पूर्वोक्तप्रकारया करणेन अतीतस्य एतावन्तं कालम् अतीत्य गतस्य प्रोषितस्य इत्यर्थः ते तव सौभाग्यं सुभगत्वम्। [इङ्गगमिध्वन्ते पूर्वपदस्य चेत्युभयपदवृद्धिः]। व्यञ्जयन्ती प्रकाशयन्ती, स खलु सुभगो यम अङ्गनाः कामयन्ते इति भावः। असौ पूर्वोक्ता सिन्धुः तदीं निर्विन्ध्या स्त्री नद्यां ना नदे सिन्धुर्देशभेदेऽम्बुधौ गजे इति वैजयन्ती]। येन विधिना व्यापारेण कार्श्यं त्यजति सः विधिः त्वया एव उपपाद्यः कर्त्तव्यः इत्यर्थः। स च विधिः एकत्र दृष्टिः अन्यत्र सम्भोगः, तदभावनिबन्धनत्वात् कार्श्यस्य इति भावः। [इयं पञ्चमी मदनावस्था-

आप्यावन्तीनुदयनकथाकोविदग्रामवृद्धान्
पूर्वोद्दिष्टामनुसर पुरीं श्रीविशालां विशालाम् ।
स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानां
शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत् खण्डमेकं ३१

तदुक्तं रतिरहस्ये, नयनप्रीति. प्रथमं चित्तासङ्गस्ततोऽथ सङ्कल्पः। निद्राच्छेदस्तनुता विषयनिवृत्तिस्त्रपानाश्यः। उन्मादो मूर्च्छा मृतिरित्येताः स्मरदशा दशैव स्युरिति। तामतीतस्येति पाठमाश्रित्य सिन्धुनाम नद्यन्तरमिति व्याख्यानं तु सिन्धुर्नाम कश्चित् नदः काश्मीरदेशे स्थितः, नदी तु क्वापि नास्तीत्युपेक्ष्यमित्याचक्षते ] ॥३०॥

प्राप्येति। विदन्ति इति विदाः [इगुपधलक्षणः कः]। ओकसो वेद्यस्थानस्य विदाः कोविदाः [ओकारलोपः पृषोदरादित्वात् साधुः] उदयनस्य वत्सराजस्य कथानां वासवदत्ताहरणाद्यद्भुतोपाख्यानानां कोविदाः तत्त्वज्ञाः ग्रामेषु ये वृद्धाः ते सन्ति येषु तान् अवन्तीन् तन्नामजनपदान् प्राप्य तत्र पूर्वोद्दिष्टां पूर्वोक्तां प्रणयविमुखो मास्म भूरुज्जयिन्या इत्युक्तां श्रीविशालां सम्पत्तिमहतीम् [श्रीर्भासम्पत्तिपद्मासु लक्ष्मीः श्रीरिव दृश्यते इति शाश्वतः] विशालां पुरीम् उज्जयिनीमनुसर व्रज कथमिव स्थितां सुचरितफले पुण्यफले स्वर्गोपभोगलक्षणे स्वल्पीभूते अत्यल्पावशिष्टे सति इत्यर्थः गां भूमिं गतानाम्। [गौरिला क्लीबिनी क्षमेत्यमरः]। पुनरपि भूलोकगतानामित्यर्थः स्वर्गिणां स्वर्गवतां जनानां शेषैः भुक्तशेषैः पुण्यैः सुकृतैः कृतम्

दीर्घीकुर्वन् पटु मदकलं कूजितं सारसानां
प्रत्यूषेषु स्फुटितकमलामोटमैत्रौकषायः ।
यत्र स्त्रीणां हरति सुरतग्लानिमङ्गानुकूलः
शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः ॥३२॥

आनीतं स्वर्गार्थानुष्ठितकर्मशेषाणां स्वर्गदानावश्यम्भावात् इति भावः कान्तिरस्य अस्तीति कान्तिमत् उज्ज्वलं सार-भूतमित्यर्थः एकं भुक्तात् अन्यत् [एके मुख्यान्यकेवला इत्य-मरः]। दिवः स्वर्गस्य खण्डमिव स्थितामित्युत्प्रेक्षा। एतेन अतिक्रान्तसकलभूलोकनगरसौभाग्यसारत्वम् उज्ज-यिन्या व्यज्यते ॥३१॥

दीर्घीकुर्वन्निति। यत्र विशालायां प्रत्यूषेषु अहर्मु-खेषु [प्रत्यूषोऽहर्मुखं कल्यमित्यमरः]। पटु प्रस्फुटं मद-कलं मदेन अव्यक्तमधुरम्। [ध्वनौ तु मधुरास्फुटे कल इत्यमरः]। सारसानां पक्षिविशेषाणाम्। [सारसो मैथुनी कामी गोनर्दः पुष्कराह्वय इति यादवः]। यद्वा सारसानां हंसानां [चक्राङ्गः सारसो हंस इति शब्दार्णवे]। कूजितं रुतं दीर्घीकुर्वन् सन्तानयन् इत्यर्थः यावद्वातं शब्दानुवृत्ते-रिति भावः एतेन, प्रियतमः स्वचाटुवाक्यानुसारि क्रीड़ा-पक्षिकूजितम् अविच्छिन्नीकुर्वन् इति च गम्यते। स्फुटि-तानां विकसितानां कमलानाम् आमोदेन परिमलेन सह या मैत्री संसर्गः तेन कषायः सुरभिः [रागद्रव्ये कषा-योऽस्त्री निर्यासे सौरभे रसे इति यादवः] अन्यत्र विमर्दगन्धी इत्यर्थः [विमर्दोत्थे परिमलो गन्धे जनमनोहरे। आमोदः

जालोद्गीर्णैरुपचितवपुः केशसंस्कारधूपै-
र्बन्धुप्रीत्या भवनशिखिभिर्दत्तनृत्योपहारः ।
हर्म्यैष्वस्याः कुसुमसुरभिष्वध्वखेदं नयेथा
लक्ष्मीं पश्यन् ललितवनितापादरागाङ्कितेषु ॥३३

सोऽतिनिर्हारीत्यमरः] । अङ्गानुकूलो मान्द्यात् सुखस्पर्शः अन्यत्र गाढालिङ्गनदत्तगात्रसंवाहनः इत्यर्थः । भवभूतिना च उक्तम, अग्निश्लिष्टपरिरम्भैर्दत्तसंवाहनानीति । संवाह्यन्ते च सुरतश्रान्ताः प्रियैर्युवतयः । एतत् कविरेव वक्ष्यति, सम्भोगान्ते मम समुचितो हस्तसंवाहनानामिति । शिप्रा नाम काचित् तत्रत्या नदी तस्याः वातः शिप्रावातः शिप्राग्रहणं शैत्यद्योतनार्थं प्रार्थना सुरतस्य याच्ञा तत्र चाटूनि करोतीति तथोक्तः पुनः सुरतार्थं प्रियवचनप्रयोक्ता इत्यर्थः [ कर्मण्यण्प्रत्ययः ] । प्रियतमः वल्लभः इव स्त्रीणां सुरतग्लानिं सम्भोगखेदं हरति नुदति चाटूक्तिभिर्विस्मृतपूर्वखेदाः स्त्रियः प्रियतमप्रार्थनां सफलयन्ति इति भावः । प्रार्थनाचाटुकार इत्यत्र खण्डितनायिका अनुनेतेति व्याख्याने सुरतग्लानिहरणं न सम्भवति तस्याः पूर्वं सुरताभावात् पश्चात्तनसुरतग्लानिहरणं तु नेदानीन्तनकोपशमनार्थचाटुवचनसाध्यमित्युपेक्षैवोचिता विवेकिनाम् । [ श्लाघेऽन्यासङ्गविकृते खण्डितेर्ष्याकषायितेति दशरूपके ] ॥ ३२ ॥

जालोद्गीर्णैरिति । जालोद्गीर्णैः गवाक्षमार्गनिर्गतैः । [ जालं गवाक्षे स्यानाये जालके कपटे गणे इति यादवः ।]

भर्तुः कण्ठच्छविरिति गणैः सादरं वीक्ष्यमाणः
पुण्यं यायास्त्रिभुवनगुरोर्धाम चण्डीश्वरस्य ।
धूतोद्यानं कुवलयरजोगन्धिभिर्गन्धवत्या-
स्तोयक्रीड़ानिरतयुवतिस्नानतिक्तैर्मरुद्भिः ॥३४॥

केशसंस्कारधूपैः वनिताकेशवासनार्थैः गन्धद्रव्यधूपैः इत्यर्थः [ अत्र संस्कारधूपयोस्तादर्थ्येऽपि यूपदार्वादिवत् प्रकृति-विकारत्वाभावात् अश्ववासादिवत् षष्ठीसमासो न चतुर्थीसमासः ]। उपचितवपुः परिपुष्टशरीरः बन्धौ बन्धुरिति वा प्रीत्या भवनशिखिभिः गृहमयूरैः दत्तः नृत्यम् एव उपहारः उपायनं यस्मै स तथोक्तः [ उपायनमुपग्राह्यमुपहारस्तथोपदेत्यमरः ]। कुसुमैः सुरभिषु सुगन्धिषु ललितवनिताः सुन्दरस्त्रियः [ ललितं त्रिषु सुन्दरमिति शब्दार्णवे ]। तासां पादरागेण लाक्षारसेन अङ्कितेषु चिह्नितेषु हर्म्येषु धनिकभवनेषु अस्याः उज्जयिन्याः लक्ष्मीं पश्यन् अध्वगमनेन खेदं क्लेशं नयेथाः अपनय ॥ ३३ ॥

भर्त्तुरिति । भर्त्तुः स्वामिनः नीलकण्ठस्य भगवतः कण्ठस्येव छविर्यस्य असौ कण्ठच्छविः इति हेतोः गणैः प्रमथैः [ गणस्तु गणनायां स्यात् गणेशे प्रमथे चये इति शब्दार्णवे ]। सादरं यथा तथा वीक्ष्यमाणः सन् प्रियवस्तुसाहश्यात् अतिप्रियत्वं भवेत् इति भावः । त्रयाणां भुवनानां समाहारः त्रिभुवनम् । [ तद्धितार्थेत्यादिना समासः ]। तस्य गुरोः त्रैलोक्यनाथस्य चण्डीश्वरस्य कात्यायनीवल्लभस्य पुण्यं पावनं धाम महाकालाख्यं स्थानं

**अप्यन्यस्मिन् जलधर ! महाकालमासाद्य काले**
**स्थातव्यं ते नयनविषयं यावदत्येति भानुः ।**
**कुर्वन् सन्ध्याबलिपटहतां शूलिनः श्लाघनीया-**
**मामन्द्राणां फलमविकलं लप्स्यसे गर्जितानाम् ३५**

यायाः गच्छ [ विध्यर्थे लिङ् ] श्रेयस्करत्वात् सर्वथा गन्तव्यम् इति भावः । उक्तञ्च स्कान्दे, आकाशे तारकं लिङ्गं पाताले हाटकेश्वरम् । मर्त्यलोके महाकालं दृष्ट्वा कामिमवाप्नुयादिति । न केवल मुक्तिस्थानमिदं किन्तु विलासस्थानमपीत्याह धूतेति । कुवलयरजोगन्धिभिः उत्पलपरागगन्धवद्भिः तोयक्रीड़ासु निरतानाम् आसक्तानां युवतीनां स्नानं स्नानीयं चन्दनादि [ करणे ल्युट् ]। [ स्नानीयेऽभिषवे स्नानमिति यादवः ]। तेन तिक्तैः सुरभिभिः [ कटुतिक्तकषायास्तु सौरभे च प्रकीर्त्तिता इति हलायुधः ]। सौगन्ध्यातिशयार्थं विशेषणद्वयम् । गन्धवत्याः नाम नद्याः तत्रत्यायाः मरुद्भिः मारुतैः धूतोद्यानं कम्पितोपवनम् इति धात्वो विशेषणम् ॥ ३४ ॥

अपीति । हे जलधर ! महाकालं नाम पूर्वोक्तं चण्डीश्वरस्थानम् अन्यस्मिन् सन्ध्यातिरिक्तेऽपि काले आसाद्य प्राप्य ते त्वं स्थातव्यं त्वया स्थातव्यम् इत्यर्थः [ कृत्यानां कर्त्तरि वेति षष्ठी ]। यावत् यावता कालेन भानुः सूर्यः नयनविषयं दृष्टिपथम् अत्येति अतिक्रामति वा अस्तमयात् स्थातव्यम् इत्यर्थः [ यावत् इत्येतत् अवधारणार्थं, यावत् तावच्च साकल्येऽवधौ मानेऽवधारणे इत्यमरः ]। किमर्थम्

पादन्यासैः क्वणितरशनास्तत्र लीलावधूतै-
रत्नच्छायाखचितबलिभिश्चामरैः क्लान्तहस्ताः ।
वेश्यास्त्वत्तो नखपदसुखान् प्राप्य वर्षाग्रबिन्दू-
नामोक्ष्यन्ते त्वयि मधुकरश्रेणिदीर्घान् कटाक्षान् ॥ ३५

अतः आह कुर्वन्निति । श्लाघनीयां प्रशस्यां शूलिनः शिवस्य सन्ध्यायां बलिः पूजा तत्र पटहतां कुर्वन् सम्पादयन् आमन्द्राणाम् ईषद्गम्भीराणां गर्जितानाम अविकलम् अखण्डं फलं लप्स्यसे प्राप्स्यसि [ लभेः कर्त्तरि लृट् ] । महाकालनाथबलिपटहत्वेन विनियोगात्ते गर्जितसाफल्यं स्यात् इत्यर्थः ॥ ३५ ॥

पादन्यासैरिति । तत्र सन्ध्याकाले पादन्यासैः चरणनिक्षेपैः नृत्याङ्गैः क्वणिताः शब्दायमानाः रशनाः यासां ताः तथोक्ताः क्वणेतरकर्मकत्वात् गत्यर्थाकर्मकेत्यादिना कर्त्तरि क्तः] । लीलया विलासेन अवधूतैः कम्पितैः रत्नानां कङ्कणमणीनां छायया कान्त्या खचिताः रूपिताः बलयः चामरदण्डाः येषां तैः [बलिश्चामरदण्डे च जराविस्रंसधर्मणीति विश्वः] चामरैः बालव्यजनैः क्लान्तहस्ताः [एतेन दैशिकं नृत्यं सूचितम् । तदुक्तं नृत्यसर्वस्वे, खड्गकन्दुकवस्त्रादिदण्डकाचामरस्रजः । वीणाश्च धृत्वा यत् कुर्य्युर्नृत्यं तत् दैशिकं भवेदिति] । वेश्याः महाकालनाथम् उपेत्य नृत्यन्त्यो गणिकाः त्वत्तो नखपदेषु नखक्षतेषु सुखान् सुखकरान् [सुखहेतौ सुखे सुखमिति शब्दार्णवे] । वर्षस्य अग्रबिन्दून् प्राप्य त्वयि मधुकरश्रेणिदीर्घान्

पश्चादुच्चैर्भुजतरुवनं मण्डलेनाभिलीनः
सान्ध्यं तेजः प्रतिनवजपापुष्परक्तं दधानः।
नृत्यारम्भे हर पशुपतेरार्द्रनागाजिनेच्छां
शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्वा ॥३७॥

अपाङ्गान् आमोक्ष्यन्ते परैः उपकृता सन्तः सद्यः प्रत्युपकुर्वन्ति इति भावः। कामिनीदयनीयत्वलक्षणं शिवोपासनाफलं सद्यो लभ्यते इति ध्वनिः ॥१६॥

पश्चादिति। पश्चात् सन्ध्याविलयनन्तरं पशुपतेः शिवस्य नृत्यारम्भे ताण्डवप्रारम्भे प्रतिनवजपापुष्परक्तं प्रत्यग्रजपाकुसुमारुणं सन्ध्यायां भवं सान्ध्यं तेजो दधानः उच्चैः उन्नतं भुजा एव तरवः तेषां वनं मण्डलेन मण्डलाकारेण अभिलीनः अभिव्याप्तः सन् [कर्त्तरि क्तः]। भवान्या भवपत्न्या [इन्द्रवरुणभवसर्वेत्यादिना ङीप् आनुगागमश्च]। शान्तः उद्वेगः गजाजिनदर्शनभयं ययोः ते अतएव स्तिमिते निश्चले नयने यस्मिन् कर्मणि तत् तथोक्तम् [उद्वेगस्त्वरिते क्लेशे भये मन्थरयामिनीति शब्दार्णवे]। भक्तिः पूज्येषु अनुरागः [भावार्थे क्तिन्प्रत्ययः]। दृष्टा भक्तिर्यस्य स दृष्टभक्तिः सन् पशुपतेः आर्द्रं क्लेदितार्द्रं तत् नागाजिनं गजचर्म [अजिनं चर्म क्लीत्यमरः]। तव इच्छां हर निवर्त्तय त्वम् एव तत्स्थाने भव इत्यर्थः। गजासुरमर्दनानन्तरं भगवान् महादेवः तदीयम् आर्द्राजिनं भुजमण्डलेन बिभ्रत् ताण्डवं चकार इति प्रसिद्धिः। [दृष्टभक्तिरिति कथं रूपसिद्धिः दृष्टशब्दस्य स्त्रियाः पुंवत्

गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं
रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः ।
सौदामन्या कनकनिकषस्निग्धया दर्शयोर्वीं
तोयोत्सर्गस्तनितमुखरो माऽस्म भूर्विक्लवास्ताः॥३८

इत्यादिना पुंवद्भावस्य दुर्घटत्वात् अपूरणीप्रियाष्विति निषेधात् भक्तिशब्दस्य प्रियादिषु पाठादिति तदेतच्चीव्यं दृढ़भक्तिरिति शब्दम् आश्रित्य प्रतिविहितं गणव्याख्याने दृढ़ं भक्तिरस्येति नपुंसकं पूर्वपदम् अदाक्ष्यनिहृत्तिपरत्वे दृढ़शब्दात् लिङ्गविशेषस्य अनुपकारित्वात् स्त्रीत्वम् अविवक्षितमिति। भोजराजस्तु भक्तौ च कर्मसाधनायाम् इत्यनेन सूत्रेण भज्यते इति कर्मार्थत्वे भवानीभक्तिरित्यादि भवति भावसाधनायां तु स्थिरभक्तिर्भवान्यामित्यादि भवतीत्याह। तदेतत् सर्वं सम्यक् विवेचितं रघुवंशसञ्जीवन्यां दृढ़भक्तिरिति ज्येष्ठे इत्यत्र। तस्मात् दृष्टभक्तिरित्यत्रापि मतभेदेन पूर्वपदस्य स्त्रीत्वेन नपुंसकत्वेन च रूपसिद्धिरस्तीति स्थितम्] ॥३७॥

इत्थं महाकालनाथस्य सेवाप्रकारमभिधाय पुनरपि तत्सञ्चारप्रकारमाह गच्छन्तीनामिति। तत्र उज्जयिन्यां नक्तं रात्रौ रमणवसतिं प्रियभवनं प्रति गच्छन्तीनां योषितां अभिसारिकाणाम् इत्यर्थः सूचिभिः भेद्यैः अतिसान्द्रैरित्यर्थः तमोभिः महाङ्कीके निरुद्धदृष्टिप्रसरे नरपतिपथे राजमार्गे कनकस्य निकषः निकष्यते इति व्युत्पत्त्या निकषोपलगतरेखा तत्रैव स्निग्धं तेजो यस्याः तथा [स्निग्धं

तां कस्याञ्चिद्भवनवलभौ सुप्तपारावतायां
नीत्वा रात्रिं चिरविलसनात् खिन्नविद्युत्कलत्रः ।
दृष्टे सूर्ये पुनरपि भवान् वाहयेदध्वशेषं
मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः ॥३८

तु महति सान्द्रे रम्ये क्लीव तु तेजसीति शब्दार्णवे] । सुदाम्ना अद्रिणा एकदिक् सौदामनी विद्युत् [ तेनैकदिगित्यणप्रत्यय. ] । तया उर्वीं मार्ग दर्शय, किञ्च तोयोत्सर्गस्तनिताभ्यां दृष्टिगर्जिताभ्या मुखर शब्दायमानो मास्म भूः, कुतः, ताः योषितः विक्लवाः भीरव. ततो दृष्टिगर्जितं न कार्य्यं इत्यर्थः । [ नात्र तोयोत्सर्गरहितं स्तनितमिति विग्रहः विशिष्टस्यैव केवलस्तनितस्यापि अनिष्टत्वात् न च द्वन्द्वपक्षे अल्पाच् तरमिति पूर्वनिपातशास्त्रविरोधः लक्षणहेत्वोः क्रियायाः इति सूत्रे विपरीतनिर्देशेन पूर्वनिपातशास्त्रस्य अनित्यत्वज्ञापनादिति ] ॥३८॥

तामिति । चिरं विलसनात् स्फुरणात् खिन्नं विद्युत् एव कलत्रं यस्य स भवान् सुप्ताः पारावताः कलरवाः यस्यां तस्यां विविक्तायाम् इत्यर्थः [ पारावतः कलरवः कपोत इत्यमरः ] जनसञ्चारः तत्र असम्भावित एव इति भावः । कस्याञ्चित् भवनस्य वलभौ आच्छादने उपरिभागे इत्यर्थः [आच्छादनं स्याद्वलभी गृहाणामिति हलायुधः] तां रात्रिं नीत्वा सूर्ये दृष्टे दिने सति इत्यर्थः पुनरपि अध्वशेषं वाहयेत् तथाहि सुहृदां मित्राणाम् अभ्युपेता अङ्गीकृता अर्थस्य प्रयोजनस्य सत्या क्रिया यैः ते अभ्युपेतसुहृदर्था इत्यर्थः

तस्मिन् काले नयनसलिलं योषितां खण्डितानां
शान्तिं नेयं प्रणयिभिरतो वर्त्म भानोस्त्यजाशु ।
प्रालेयास्रं कमलवदनात् सोऽपि हर्त्तुं नलिन्याः
प्रत्यावृत्तस्त्वयि करवधि स्याद्अनल्पाभ्यसूयः ॥४०॥

[सापेक्षत्वेऽपि गमकत्वात् समासः । कृत्यैः क्रियादेवतयोः कार्य्यं स्त्री कुपिते त्विष्विति यादवः । कृञः श्चेति थकारात् क्यप् ] । न मन्दायन्ते खलु न मन्दाः भवन्ति हि न विलम्बन्ते इत्यर्थः । [ लोहितादिडाज्भ्यः क्यच् वा क्यष इत्यात्मनेपदम् ] ॥३९॥

तस्मिन्निति । [तस्मिन् काले पूर्वोक्ते सूर्य्योदयकाले प्रणयिभिः प्रियतमैः खण्डितानां योषितां नायिकाविशेषाणाम । [ज्ञातेऽन्यासङ्गविकृते खण्डितेर्ष्याकषायितेति दशरूपके ] । नयनसलिलं शान्तिं नेयं नेतव्यम् [नयतिर्द्विकर्मकः ] । अतो हेतो. भानोः वर्त्म आशु शीघ्रं त्यज तस्य आवरको मा भूः इत्यर्थः । विपत्ते अनिष्टमाचष्टे, सोऽपि भानुः नलानि अम्बुजानि अस्याः सन्तीति नलिनी पद्मिनी [दृणेऽम्बुजे नलं ना तु रात्रि नाले तु न स्त्रियामिति शब्दार्णवे ] । तस्याः स्वकान्तायाः कमलं स्वकुसुमम एव वदनं तस्मात् प्रालेयं हिमम् एव अस्रम् अश्रु प्रहर्त्तुं शमयितुं प्रत्यावृत्तः प्रत्यागतः, नलिन्याश्च भर्त्तुर्भानोः देशान्तरे नलिन्यन्तरगमनात् खण्डितात्वमित्याशयः । नलः लयि करान् अंशून् दृणाद्धि इति करवत् [ क्विप् ] । तस्मिन् करवधि सति हस्तरोधिनि सति इति च गम्यते [ वक्ति-

गम्भीरायाः पयसि सरितश्चेतसीव प्रसन्ने
छायात्मापि प्रकृतिसुभगो लप्स्यते ते प्रवेशम् ।
तस्मादस्याः कुमुदविशदान्यर्हसि त्वं न धैर्य्यात्
मोघीकर्त्तुं चटुलशफरोद्वर्त्तनप्रेक्षितानि ॥४०॥

हस्तांग्रवः करा इत्यमरः ]। अनल्पाभ्यसूयः अधिकविद्वेषः स्यात् प्रायेण इच्छाविशेषविघातात् द्वेषो रोषविशेषश्च कामिनामिति भावः । किञ्च, ब्राह्मणं चार्कमौडुगान विष्णु वा द्वेष्टि यो जनः । श्रेयांसि तस्य नश्यन्ति रौरवञ्च भवेत् ध्रुवमिति निषेधात् कार्य्यहानिश्च इति ध्वनि. ॥४०॥

गम्भीराया इति । गम्भीरायाः नाम सरितः उदात्तनायिका च ध्वन्यते प्रसन्ने अनुरक्तत्वात् दोषरहिते चेतसि इव प्रसन्ने निर्मले पयसि प्रकृत्या स्वभावेन सुभगः सुन्दरः [सुन्दरेऽधिकभाग्ये च दुर्दिनेतरवासरे । तुरीयांशे श्रीमति च सुभगः इति शब्दार्णवे ]। ते तव छाया चासौ आत्मा च सोऽपि प्रतिबिम्बशरीरं वा प्रवेश्य लप्स्यते साक्षात् प्रवेशमनिच्छोरपि इति भावः, तस्मात् छायाद्वारापि प्रवेशावश्यम्भावित्वात् अस्याः गम्भीरायाः कुमुदवत् विशदानि धवलानि चटुलानि शीघ्राणि शफराणां मीनानाम् उद्वर्त्तनानि उल्लुण्ठितान्येव प्रेक्षितानि अवलोकनानि [क्षिप्रं स्यात् चटुलं शीघ्रमिति विश्वः ]। एतावदेव गम्भीरायां अनुरागलिङ्गम् धैर्य्यात् धार्ष्ट्यात् वैमत्यात् मोघीकर्त्तुं विफलीकर्त्तुं न अर्हसि न अनुरक्ता विप्रलब्धव्या इत्यर्थः ।

तस्याः किञ्चित् करधृतमिव प्राप्तवानीरशाखं
हृत्वा नीलं सलिलवसनं मुक्तरोधोनितम्बम्।
प्रस्थानं ते कथमपि सखे! लम्बमानस्य भावि
ज्ञातास्वादो विवृतजघनां को विहातुं समर्थः॥४२॥
त्वन्निष्यन्दोच्छ्वसितवसुधागन्धसम्पर्करम्यः
स्रोतोरन्ध्रध्वनितसुभगं दन्तिभिः पीयमानः।
[ धूर्त्तलक्षणं तु, क्लिश्नाति नित्यं गमितां कामिनीमिति
सुन्दरः। उपैत्यरक्तां यत्नेन रक्तां धूर्त्तो विमुञ्चतीति ]॥४१॥

तस्या इति। हे सखे! प्राप्ता वानीरशाखा येन सः प्राप्तवानीरशाखा येन तत् तथोक्तम्, अतएव किञ्चित् ईषत् करधृतं हस्तावलम्बितम् इव स्थितं, मुक्तः त्यक्तः रोध. तटम् एव नितम्ब. कटिः येन तत् तथोक्तम् [नितम्बः पश्चिमे श्रोणि-भागेऽद्रिकटके कटाविति यादवः ] नीलं कृष्णवर्णं तस्याः गम्भीरायाः सलिलमेव वसनं हृत्वा अपनीय [प्रस्थानसमये प्रेयसीवसनहरणं विरहतापापनोदनार्थम् इति प्रसिद्धम्]। लम्बमानस्य पीतसलिलभरात् लम्बमानस्य अन्यत्र जवना-रूढ़स्य ते तव प्रस्थानं प्रयाणं कथमपि कृच्छ्रेण भावि। कृच्छ्रत्वे हेतुमाह ज्ञातेति। ज्ञातास्वादः अनुभूतरसः कः पुमान् विवृतं प्रकटीकृतं जघनं कटिः तत्पूर्वभागो वा यस्याः ताम् [जघनं स्यात् कटौ पूर्वश्रोणिभागापरांशयो-रिति यादवः ] विहातुं त्यक्तुं समर्थः? न कोऽपि इत्यर्थः॥४२॥

त्वदिति। त्वन्निष्यन्दे च तव दृष्ट्या उच्छ्वसितायाः

नीचैर्वास्यत्युपजिगमिषोर्देवपूर्वं गिरिं ते
शीतो वायुः परिणमयिता काननोदुम्बराणाम्।४३
तत्र स्कन्दं नियतवसतिं पुष्पमेघीकृतात्मा
पुष्पासारैः स्नपयतु भवान् व्योमगङ्गाजलार्द्रैः ।

उपहितायाः वसुधायाः भूमेः गन्धस्य सम्पर्केण रम्यः सुरभिः इत्यर्थः [स्रोतःशब्देन इन्द्रियवाचिना तद्विशेषो घ्राणं लक्ष्यते । स्रोत इन्द्रिये निम्नगारये इत्यमरः] । स्रोतोरध्रेषु नासाग्रकुहरेषु, यत् ध्वनितं शब्दः तेन सुभगं यथा तथा दन्तिभिः गजैः पीयमानः वसुधागन्धलोभात् आघ्रायमाण इत्यर्थः अनेन मान्यम् उच्यते । काननेषु वनेषु उदुम्बराणां जन्तुफलानाम् [उदुम्बरे जन्तुफलो यज्ञाङ्गो हेमदुग्धक इत्यमरः] । परिणमयिता परिपाचयिता [मितां ह्रस्व इति ह्रस्वः] । शीतो वायुः देवपूर्वं गिरिं देवगिरिम् इत्यर्थः उपजिगमिषोः उपगन्तुम् इच्छोः [गमेः सन्नन्तादुप्रत्ययः] । ते तव नीचैः शनैः वास्यति त्वां वीजयिष्यति इत्यर्थः । [सम्बन्धमात्रविवक्षायां षष्ठी । देवपूर्वं गिरिम् इत्यत्र देवपूर्वत्वं गिरिशब्दस्य नतु संश्लिगतत्वाभावात् अवाच्यवचनं दोषमाहुरालङ्कारिकाः । तदुक्तम् एकावल्यां, यदवाच्यस्य वचनमवाच्यवचनं हि तदिति । समाधानं तु देवशब्दविशेषितेन गिरिशब्देन शब्दपरेण मेघोपगमयोग्यो देवगिरिर्लक्ष्यते इति कथञ्चित् सम्पाद्यम् ] ॥४३॥

तत्रेति । तव देवगिरौ नियता वसतिः यस्य तं नित्यसन्निहितम् इत्यर्थः [पुरा किल तारकाख्यासुरविजयसम्भ-

[रक्षाहेतोर्नवशशिभृता वासवीनां चमूनाम्
प्रत्यादित्यं हुतवहमुखे सम्भृतं तद्धि तेजः ॥४३॥

दुष्टसुरप्रार्थनावशात् भगवान् भवानीनन्दनः स्कन्दो नित्यम अहमिह सह शिवाभ्यां वसामि इत्युक्ता तत्र वसति इति प्रसिद्धिः । ] स्वान्तं कुमारं स्वामिन पुष्पाणां मेघः पुष्पमेघो-ऽब्दसात्मा कामरूपत्वात पुष्पवर्षुकमेघीभूतविग्रहः सन् व्योमगङ्गाजलाद्रैः पुष्पासारैः पुष्पसम्पातैः [धारासम्पात आसार इत्यमरः । ] भवान स्वयम् एव स्नपयतु अभिषिञ्चतु स्वयपूजायाः उत्तमत्वात् इति भावः । तथा च ग्रन्थ,रहस्ये, स्वयं यजति चेत् देवमुत्तमा सोदराग्रजैः । मध्यमा यानयेद् भृत्यैरधमा याजनक्रियेति । ] स्कन्दस्य पूज्यत्व-समर्थकम् अर्थान्तरं न्यस्यति रक्षेति । तत् भगवान स्कन्द इत्यर्थः [विधयप्राधान्यात् नपुंसकनिर्देशः । ] वासवस्य इमाः वासव्यः [तस्येदमित्यण] तासां वासवीनाम् ऐन्द्रीणां चमूनां सेनानां रक्षा एव हेतुः तस्य रक्षाहेतोः रक्षया कारणेन रक्षार्थम् इत्यर्थः [षष्ठी हेतुप्रयोगे इति षष्ठी । ] नवशशिभृता भगवता चन्द्रशेखरेण वहति इति वह्निः [पचा-द्यच् ] हुतस्य वह्निः हुतवह्निः वह्निः तस्य मुखे सम्भृतं सञ्चि-तम् आदित्यम् अतिक्रान्तम् *अत्यादित्यम् [अत्यादयः क्रान्ताद्यर्थे द्वितीयेति समासः *] तेजो हि साक्षात् भग-वतो रुद्रस्य एव मूर्त्यन्तरम् इत्यर्थः अतः पूज्यमिति भावः । [मुखपदं तु यजत्वसूचनार्थम् । तदुक्तं ग्रन्थान्तरे, गवां

ज्योतिर्लेखावलयि गलितं यस्य बर्हं भवानी
पुत्रप्रेम्णा कुवलयदलप्रापि कर्णे करोति ।
धौतापाङ्गं हरशशिरुचा पावकेस्तं मयूरं
पश्चादद्रिग्रहणगुरुभिर्गर्जितैर्नर्तयेथाः ॥४५॥

पश्चात् द्विजस्याङ्घ्रियोगिनां हृत् कवेर्वचः । पर शुचि-
तमं विद्याम्बु खं स्त्रीवक्त्रिवाजिनामिति ] ॥४४॥

ज्योतिरिति । ज्योतिषः तेजसः लेखाः राजयः तासां वलयं मण्डलम् अस्यास्तीति तयोक्तं, गलितं भ्रष्टं न तु लौल्यात् स्वयं छिन्नमिति भावः यस्य मयूरस्य बर्हं पिच्छं [ पिच्छबर्हे नपुंसके इत्यमरः । ] भवानी गौरी पुत्रप्रेम्णा पुत्रस्नेहेन कुवलयस्य दल पत्र तत्प्राप्ति तद्योगि यथा तथा कर्णे करोति दलेन सह धारयति इत्यर्थः, यद्वा दल-प्राप्ति दलभाजि दलार्हे कर्णे करोति [ क्षिपत्यात् सप्तमी] । दल परिहृत्य तत्स्थाने बर्हं धत्ते इत्यर्थः । [नाथस्तु कुव-लयदलक्षेपीति पाठमनुसृत्य क्षेपो निन्दा अपसारणं वेति व्याख्यातवान्] । हरशिरश्चन्द्रिकया धौता-पाङ्गं स्वतोऽपि शौक्ल्यात् अतिधवलितनेत्रान्तम् [ अपाङ्गो नेत्रयोरन्तावित्यमरः ] । पावकस्य अग्नेः अपत्यं पावकिः स्कन्दः [ अत इञ इति इञ् ] । तस्य तं पूर्वोक्तं मयूरं पश्चात् पुष्पाभिषेचनानन्तरम् महेः देवगिरेः क्रौञ्चः महा-येन गुहासंक्रमणेन गुरुभिः प्रतिध्वानमहद्भिः इत्यर्थः गर्जितैः नर्तयेथाः इत्यं कारय मार्दङ्गिकभावेन मयूरस्य कुमारम् उपाकर्ष इति भावः । [ नर्तयेथा इत्यत्र पश्चात्-

आराध्यैनं शरवणभवं देवमुल्लङ्घिताध्व
सिद्धद्वन्द्वैर्जलकणभयाद्वीथिभिर्मुक्तमार्गः ।
व्यालम्बेथाः सुरभितनयालम्भजां मानयिष्यन्
स्रोतोमूर्त्या भुवि परिणतां रन्तिदेवस्य कीर्तिम्
॥४५॥

कर्मकाञ्चित्तवत्कं कादित्वाभ्यनेपदापवादः निगरणचलना-
र्थेभ्यश्चेति परस्मैपदं न भवति तस्य न पादस्याङ्यम्परि-
सृहरुचिनृतिवदवस्र इति प्रतिषेधात् ] ॥ ४५ ॥

आराध्येति । एनं पूर्वोक्तं शराः बाणटपानि [ शरो बाणे बाणटपे इति शब्दार्णवे ]। तेषां वनं शरवणम् । [ प्रनिरन्तःशरेत्यादिना षत्वम् ]। तत्र भवः जन्म यस्य तं शरवणभवं देवं स्कन्दम् । [ शरजन्मा षड़ानन इत्यमरः । अवर्ज्यो बहुव्रीहिर्व्यधिकरणो जन्मादुत्तरपद इति वामनः] । अवर्ज्यः अगतिकत्वात् आश्रयणीय इत्यर्थः आराध्य उपास्य वीथिभिः वीथावस्थिः [ व्रीह्यादित्वादिनिः ] । सिद्धद्वन्द्वैः सिद्धमिथुनैः भगवन्तं स्कन्दम् उपवीणयितुम् आगतैः इति भावः जलकणभयात् जलसेकस्य वीणावरणप्रतिबन्धकत्वात् इति भावः मुक्तमार्गः त्यक्तवर्त्मा सन् उज्झितार्ध्वा क्रियन्तम् अध्वानं गत इत्यर्थः सुरभितनयालम्भजां गवाम् आलम्भेन संज्ञपनेन जायते इति तथोक्तां भुवि लोके स्रोतोमूर्त्या प्रवाहरूपेण परिणतां रूपविशेषम् आपन्ना रन्तिदेवस्य दशपुरपतेः महाराजस्य कीर्तिं चर्मण्वत्याख्यां नदीम् इत्यर्थः मानयिष्यन् सत्कारिष्यन् व्याल-

त्वय्यादातुं जलमवनते शार्ङ्गिणो वर्णचौरे
तस्याः सिन्धोः पृथुमपि तनुं दूरभावात्प्रवाहम्।
प्रेक्षिष्यन्ते गगनगतयो नूनमावर्ज्य दृष्टीः
एकं मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलम् ४७
तामुत्तीर्य व्रज परिचितभ्रूलताविभ्रमाणां
पक्ष्मोत्क्षेपादुपरिविलसत्कृष्णशारप्रभाणाम्।

स्वेच्छया आलम्ब्य अवतरेः इत्यर्थः। [पुरा किल राज्ञो रन्तिदेवस्य गवालम्भेषु एकत्र सम्भृतात् रक्तनिष्यन्दत्वात् चर्मराशेः काचित् नदी सस्यन्दे सा चर्मण्वतीति आख्यायते]॥४॥

त्वयीति। शार्ङ्गिणः कृष्णस्य वर्णस्य कान्तेः चौरे वर्णचौरे तत्तुल्यवर्णे इत्यर्थः त्वयि जलम आदातुम् अवनते सति पृथुम् अपि दूरभावात् दूरत्वात् तनुं सूक्ष्मतया प्रतीयमानं तस्याः सिन्धोः चर्मण्वत्याख्यायाः प्रवाहं गगनगतिर्येषां ते गगनगतयः खेचराः सिद्धगन्धर्वादयः [अयमपि बहुव्रीहिः पूर्ववत् जन्माद्युत्तरपदेषु द्रष्टव्यः]। नूनं दृष्टीः आवर्ज्य नियम्य एकम एकयष्टिकं स्थूलः महान् मध्यः मध्यमणीभूतः इन्द्रनीलः यस्य तं भुवः भूमेः मुक्तागुणं मुक्ताहारम् इव प्रेक्षिष्यन्ते। [अत्र अत्यन्तनीलमेचकस्य प्रवाहस्य भृङ्गकण्ठमुक्तागुणत्वेन उत्प्रेक्षैव इवशब्देन व्यज्यते। निरुक्तकारस्तु तत्र तत्रोपमा यत्र इवशब्दस्य दर्शनमिति इवशब्ददर्शनात् अत्रापि उपमैवेति मन्यते॥४७॥

तामिति। तां चर्मण्वतीम् उत्तीर्य भ्रुवो लताः इव

कुन्दक्षेपानुगमधुकरश्रीमुषामात्मबिम्ब
प्रालेयाद्रेरुपवनमदस्तेतुमारब्धवान्सि ।
आलोकुर्वन्सुरपुरवधूनेत्रकौतूहलानाम् ॥४८॥
ब्रह्मावर्त्तं जनपदमथ स्वाययावाददानः
क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद्भजेथाः ।

भ्रूलताः उपमितरम्भास्तम्भाः] । तासां विभ्रमाः विलासाः परिचिताः भ्रूमाः येषु तेषां पक्ष्माणि नेत्रलोमानि [ पक्ष्म सूत्रे च सूक्ष्मांशे किञ्जल्के नेत्रलोमनीति शाश्वतः ]। तेषाम् उत्क्षेपात् उन्नमनात् हेतोः कृष्णाश्च ताः शारश्च कृष्णशाराः नीलशाराः [ वर्णो वर्णेनेति समासः । कृष्ण-रक्तसिताः शारा इति यादवः । ततश्च शारशब्दात् एव सिद्धे कार्ष्णे पुनः कृष्णपदोपादानं कार्ष्ण्यप्राधान्यार्थं रक्तत्वं तु न विवक्षितम् उपक्षाननुसारात् तस्य स्वाभाविकस्य स्त्रीनेत्रेषु सामुद्रिकविरोधात् इतरस्य अप्रसङ्गात् क्वचित् भावकथनं तु उपपत्तिविषयम् ]। उपरि विलसन्त्यः कृष्ण-शाराः प्रभाः येषां तेषां कुन्दानि माध्यकुसुमानि तेषां क्षेपः इतस्ततः चलन तस्य अनुगाः अनुसारिणः ये मधु-कराः तेषां श्रिय मुषन्ति इति तथोक्तानां विप्रयमाण-कुन्दानुधाविमधुकरकान्तीनाम् इत्यर्थः दशपुरं रन्तिदेवस्य नगर तत्र बध्व. स्त्रिय. [ बधूर्जाया स्नुषा स्त्री च इत्य-मर ] । तासां नेत्रकौतूहलानां नेत्रानिलाषाणां स्वामि-लाषदृष्टीनाम् इत्यर्थः आत्मविम्बं स्वमूर्तिं दर्शनोत्सुकं विषय कुर्वन् व्रज गच्छ । ४८ ॥

ब्रह्मावर्तमिति । अत्र मनुः सरस्वतीदृषद्वत्योर्देवन-

राजन्यानां शितशरशतैर्यत्र गाण्डीवधन्वा
धारापातैस्त्वमिव कमलान्यभ्यवर्षन्मुखानि ॥४९॥
हित्वा हालामभिमतरसां रेवतीलोचनाङ्कां
बन्धुप्रीत्या समरविमुखो लाङ्गली याः सिषेवे ।

ज्योर्यदन्तरम्। तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते इति]। अथ अनन्तरं ब्रह्मावर्तं नाम जनपदं छायया अनातपमण्डलेन साहमानः प्रविशन् न तु स्वरूपेण [पीठमर्दो नाटकाचार्यसहायो विदूषकः। इत्यमरः] त्रैलाक्यमादीनि परिहृत्यान्यतो व्रजेत् इति वचनात्]। क्षत्रप्रधनपिशुनम् अद्यापि शिरःकपालादिमत्तया कुरुयाण्डवयुद्धसूचकम् इत्यर्थः [युद्धमायोधनं जन्यं प्रधनं प्रविदारणमित्यमरः]। तत् प्रसिद्धं कुरूणाम् इदं कौरवं क्षेत्रं भजेथाः कुरुक्षेत्रं व्रज इत्यर्थः यत्र कुरुक्षेत्रे गाण्डी अस्य अस्तीति गाण्डीवं धनुर्विशेषः [गाण्डिवजगात् संज्ञायामिति मत्वर्थीयो वप्रत्ययः। कपिध्वजस्य गाण्डीवगाण्डिवौ पुंनपुंसकौ इत्यमरः]। तत् धनुः यस्य सः गाण्डीवधन्वा अर्जुनः [वा संज्ञायामित्यनङादेशः]। शितशरशतैः निशितबाणसहस्रैः राजन्यानां राज्ञां मुखानि धाराणाम् उदकधाराणां पातैः कमलानि त्वम् इव अभ्यवर्षत् अभिमुखं हतवान् शरवर्षेण शिरांसि चिच्छेद इत्यर्थः ॥४९॥

हित्वेति। बन्धुप्रीत्या कुरुपाण्डवस्नेहेन न तु भयेन समरविमुखो युद्धनिःस्पृहः लाङ्गलम् अस्य अस्तीति लाङ्गली हलधरः अभिमतरसाम् अभीष्टस्वादां तथा रेवत्याः स्वप्रियायाः लोचने एव कृष्णः प्रतिबिम्बितत्वात् चिह्नं यस्याः

ह्रत्वा सारस्वतीनामभिगममपां सौम्य ! सारस्वतीनाम्
अन्तःशुद्धस्त्वमपि भविता वर्णमात्रेण कृष्णः ॥५०॥
तस्माद्गच्छेरनुकनखलं शैलराजावतीर्णां
जह्नोः कन्यां सगरतनयस्वर्गसोपानपङ्क्तिम्।
गौरीवक्त्रभ्रुकुटिरचनां या विहस्येव फेनैः
शम्भोः केशग्रहणमकरोदिन्दुलग्नोर्मिहस्ता ॥५१॥

तां हालां सुरां [सुरा हलिप्रिया हालेत्यमरः। अभियुक्तं देशभाषापदमित्यत्र सूत्रे हालेति देशभाषापदमप्यतीव कविप्रयोगात् साध्विति उदाजहार वामनः]। ह्रित्वा त्यक्त्वा दुस्त्यजामपि हृति भावः याः सारस्वतीः अपः सिषेवे हे सौम्य ! सुभग ! त्वं तासां सरस्वत्याः नद्याः इमाः सारस्वत्यः तासाम् अभिगम सेवां कृत्वा अन्तः अन्तरात्मनि शुद्धः निर्मलः निर्दोषः भविता [खनु लृट्चाविति लृट्]। अपि खल्वेव पूतो भविष्यसि इत्यर्थः [वर्त्तमानसामीप्ये वर्त्तमानवद्वेति वर्त्तमानप्रत्ययः]। वर्णमात्रेण वर्णेन एव कृष्णः श्यामः न तु पापेन इत्यर्थः अन्तःशुद्धिरेव सम्पाद्या न तु बाह्या बहिःशुद्धोऽपि सूतवधप्रायश्चित्तार्थं सारस्वत-सलिलसेवी तत्र भगवान् बलभद्र एव निदर्शनम्। अतः भवतापि सरस्वती सर्वथा सेवितव्या इति भावः ॥५०॥

तस्मादिति। तस्मात् कुरुक्षेत्रात् कनखलस्य गङ्गाः समीपे अनुकनखलम् [अनुर्यत्समयेत्यव्ययीभावः]। शैल-राजात् हिमवतः अवतीर्णां सगरतनयानां स्वर्गसोपान-पङ्क्तिं स्वर्गप्राप्तिसाधनभूताम् इत्यर्थः जह्नोः नाम राज्ञः

तस्याः प्रातुं सुरगज इव व्योम्नि पश्चार्द्धलम्बी
त्वच्चेदच्छस्फटिकविशदं तर्कयेस्तिर्य्यगम्भः ।
संसर्पन्त्या सपदि भवतः स्रोतसि छायया सौ
स्यादस्थानोपगतयमुनासङ्गमेवाभिरामा ॥५२॥

कन्यां जाह्नवीं गच्छेः गच्छ [विध्यर्थे लिङ्] । या जाह्नवी गौर्याः वक्त्रे या भ्रुकुटिरचना सापत्न्यरोषात भ्रूभङ्गकारणं ता फेनैः विहस्य हसित्वा इव धावन्त्यात फेनानां हासत्वेन उत्प्रेक्षा । इन्दौ शिरोमाणिक्यभूते लग्नाः ऊर्मयः एव हस्ताः यस्याः सा इन्दुलग्नोर्मिहस्ता सती शम्भोः केशग्रहणम् अकरोत् । यथा कांचित प्रौढा नायिका सपत्नीम् असहमाना स्वमाहात्म्यं प्रकटयन्ती स्वभर्त्तारं सह शिरोरत्नेन केशेषु आकर्षति तद्वत् इति भावः । [इदञ्च पुरा किल भगीरथप्रार्थनया भगवतीं गगनपथात् पतन्तीं गङ्गा गङ्गाधरो जटाजूटेन जग्राहेति कथाम् उपजीव्य उक्तम् ] ॥५१॥

तस्या इति । सुरगज इव कश्चित् दिग्गज इव व्योम्नि पश्चात् अर्द्धं पश्चार्द्धं [पृषोदरादित्वात् साधुः] । तेन लम्बते इति पश्चार्द्धलम्बी सन् पश्चार्द्धभागेन व्योम्नि स्थित्वा पूर्वार्द्धेन जलोन्मुख इत्यर्थः [केचित् पूर्वार्द्धलम्बीति पठन्ति ] अच्छस्फटिकविशदं निर्मलस्फटिकावदातं तस्याः गङ्गायाः अम्भः तिर्य्यक् तिरश्चीनं यथा तथा पातुं स्वं तत्रैव विचारयेः चेत् सपदि स्रोतसि प्रवाहे संसर्पन्त्या संक्रामन्त्या भवतः छायया प्रतिबिम्बेन असौ गङ्गा यस्यां नि

आसीनानां सुरभितशिलं नाभिगन्धैर्मृगाणां
तस्या एव प्रभवमचलं प्राप्य गौरं तुषारैः ।
वक्ष्यस्यध्वश्रमविनयने तस्य शृङ्गे निषण्णः
शोभां शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयाम् ॥५३

प्रयागात् पश्चात्त्र उपगतः प्राप्तः, यमुनासङ्गमः यया सा तथाभूता इव अभिरामा स्यात् ॥ ५२ ॥

आसीनानामिति । आसीनानाम् उपविष्टानां मृगाणां कस्तूरिकामृगाणाम् । [ अन्यथा नाभिगन्धानुपपत्तेः ] नाभिगन्धैः कस्तूरीगन्धैः तेषां तदुद्भवत्वात् अत एव सुरभिनाभिसंज्ञा च] मृगनाभिर्मृगमदः कस्तूरी चेत्यमरः ] । अथवा नाभयः कस्तूर्यः [ नाभिः प्रधाने कस्तूर्यां मदे च क्वचिदीरित इति विश्वः ] । ताभां गन्धैः सुरभिताः सुरभीकृताः शिलाः यस्य तं तस्याः गङ्गायाः एव प्रभवति अस्मात् इति प्रभवः कारणं तुषारैः गौरं सितम् [ अवदातः सितो गौर इत्यमरः ] अचलं प्राप्य विनीयते अनेन विनयनम् । [करणे ल्युट्] अध्वश्रमस्य विनयने अपनोदके तस्य हिमाद्रेः शृङ्गे निषण्णः सन् शुभ्रः श्वेतः त्रिनयनस्य त्र्यम्बकस्य वृषः वृषभः [ वृषभे वृष इत्यमरः ] । तेन उत्खातेन विदारितेन यत्नेन सह उपमेयाम् उपमातुम् अर्हां शोभां वक्ष्यसि वोढ़ासि । वहतेर्लुट् । [ विनयनेत्यत्र पूर्वपदात् संज्ञायामग इति णत्वं न भवति सुश्रादिषु चेति निर्देशात् । तस्याः प्रभवम् इत्यादिना हिमाद्रौ मेघस्य वैयाधिकारो वक्ष्यतीति] ॥ ५३ ॥

तच्चेद्वायौ सरति सरलस्कन्धसङ्घट्टजन्मा
बाधेतोल्काक्षपितचमरीबालभारो दवाग्निः ।
अर्हस्येनं शमयितुमलं वारिधारासहस्रैः
आपन्नार्त्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम् ॥ ५४
ये संरम्भोत्पतनरभसाः स्वाङ्गभङ्गाय तस्मिन्
मुक्ताध्वानं सपदि शरभा लङ्घयेयुर्भवन्तम् ।

तमिति । वायौ वनवाते सरति वाति सति सरलानां देवदारुद्रुमाणां स्कन्धाः प्रदेशविशेषाः [ अस्त्री प्रकाण्डः स्कन्धः स्यान्मूलाच्छाखाबधेस्तरोरित्यमरः । तेषां सङ्घट्टेन सङ्घर्षणेन जन्म यस्य स तथोक्तः [ जन्मोत्तरपदत्वात् व्यधिकरणोऽपि बहुव्रीहिः साधुरित्युक्तम्] । उल्काभिः स्फुलिङ्गैः क्षपिता निर्दग्धाः चमरीणां बालभाराः केशसमूहा येन स तथोक्तः, दव एव अग्निः दवाग्निः वनवह्निः [ वनं च वनी च दवो दाव इत्यन्तं इति यादवः ] । त हिमाद्रिं बाधेत चेत् पीड़येत् यदि एनं दवाग्निं वारिधारासहस्रैः शमयितुं अर्हसि । युक्तञ्च एतत् इत्याह, उत्तमानां महतां सम्पदः सम्पदयः आपन्नानाम् आर्त्तानाम् आर्त्तिप्रशमनम् आपन्निवारणम् एव फलं प्रयोजनं यासां ताः तथोक्ताः हि, अतो हिमाचलस्य दावानलः त्वया शमयितव्यः इति भावः ॥ ५४ ॥

य इति । तस्मिन् हिमाद्रौ संरम्भः कोपः [ संरम्भः संक्रमे कोपे इति शब्दार्णवे ] । तेन उत्पतने उत्प्लवने रभसः वेगः येषां ते तथोक्ताः [ रभसो हर्षवेगयोरिति

तान् कुर्वीथास्तुमुलकरकावृष्टिपातावकीर्णान्
के वा न स्युः परिभवपदं निष्फलारम्भयत्नाः॥५५॥

विश्वः]। ये शरभाः अष्टापदमृगविशेषाः [शरभः शलभे चाष्टापदे प्रोक्तो मृगान्तरे इति विश्वः] मुक्ताः अध्वा शरभोत्प्लवनमार्गं. येन तं भवन्तं सपदि स्वाङ्गभङ्गाय लङ्घयेयुः [सम्भावनायां लिङ्]। भवतोऽतिदूरत्वात् स्वाङ्गभङ्गातिरिक्तं फलं नास्ति लङ्घनस्य इत्यर्थः तान् शरभान् तुमुलाः सङ्कुलाः करकाः वर्षोपलाः [वर्षोपलस्तु करकेत्यमरः]। तासां वृष्टिः तस्याः पातेन अवकीर्णान् विक्षिप्तान् कुर्वीथाः कुरुष्व [विध्यर्थे लिङ्]। क्षुद्रोऽपि अधिक्षिपन् प्रतिपक्षः सद्यः प्रतिक्षेपव्यः इति भावः तथाहि आरभ्यन्ते इति आरम्भः कर्माणि तेषु यत्नः उद्योगः स निष्फलः येषां ते तथोक्ताः निष्फलकर्मोपक्रमाः इत्यर्थः अतः के वा परिभवपदं तिरस्कारपदं न स्युर्न भवन्ति सर्वे एव भवन्ति इत्यर्थः। [यद्वा घनोपलस्तु करक इति यादवचनात् करकशब्दस्य क्वियत्पुंलिङ्गताभिप्रायेण करकाणाम् अवृष्टिरिति केषाञ्चित् व्याख्यानं तत् अन्ये न अनुमन्यन्ते वर्षोपलस्तु करकेत्यमरवचनव्याख्याने क्षीरस्वामिना कमण्डलौ च करकः सुगते च विनायक इति नानार्थे पुंस्यपि वक्ष्यत इति वदता उभयलिङ्गताप्रकाशनात्। यादवस्य तु पुंलिङ्गताविधाने तात्पर्यं न तु स्त्रीलिङ्गतानिषेधे इति न तद्विरोधोऽपि। करकस्तु करङ्के स्यात्फलकोशे च कमण्डलौ। पक्षिभेदे करे चापि करका तु घनो-

तत्र व्यक्तं दृषदि चरणन्यासमर्द्धेन्दुमौलेः
शश्वत्सिद्धैरुपचितबलिं भक्तिनम्रः परीयाः ।
यस्मिन् दृष्टे करणविगमादूर्ध्वमुद्धूतपापाः
सङ्कल्पन्ते स्थिरगणपदप्राप्तये श्रद्दधानाः ॥५६॥

पले इति विश्वप्रकाशवचने तु उभयलिङ्गता व्यक्तेवेति न कुत्रापि विरोधवार्त्ता अतएव रुद्रः वर्षोपलस्तु करका करकोऽपि च दृश्यते] ॥ ५५ ॥

तत्रेति । तत्र हिमाद्रौ दृषदि कस्याश्चित् शिलायां व्यक्तं प्रकटं शश्वत् सदा सिद्धैः योगिभिः [सिद्धिर्निष्पत्ति-योगयोरिति विश्वः]। उपचितबलिं रचितपूजाविधिं [बलिः पूजोपहारयोरिति यादवः]। अर्द्धचासौ इन्दुश्चेति अर्द्धेन्दुः [अर्द्धः खण्डे समेऽंशके इति विश्वः]। स मौली यस्य तस्य ईश्वरस्य चरणन्यासं पादविन्यासं भक्तिः पूज्येषु अनुरागः तया नम्रः सन् परीयाः प्रदक्षिणं कुरु [परिपूर्वादिणो लिङ्]। यस्मिन् पादन्यासे दृष्टे सति उद्धूतपापा निरस्तकल्मषाः सन्तः श्रद्दधानाः विश्वसन्तः पुरुषाः श्रद्धा विश्वासः आस्तिक्यबुद्धिरिति यावत् [श्रद्दधातेरुपसर्गसंबन्धर्त्तिर्वक्तव्येति श्रत्पूर्वात् दधातेः मानच्]। करणस्य क्षेत्रस्य विगमात् जन्म देहत्यागानन्तरम् [करणं साधकतमं क्षेत्रगात्रेन्द्रियेष्वपीत्यमरः]। स्थिरं शाश्वतं गणानां प्रमथानां पदं स्थानम् [गणाः प्रमथसंघौघा इति वैजयन्ती]। तस्य प्राप्तये सङ्कल्पन्ते समर्था भवन्ति। [कृतेः पर्याप्तिवचनस्य अलमर्थत्वात् तद्योगे नमःस्वस्तीत्यादिना

शब्दायन्ते मधुरमनिलैः कीचकाः पूर्यमाणाः
संसक्ताभिस्त्रिपुरविजयो गीयते किन्नरीभिः ।
निर्ह्रादस्ते मुरज इव चेत् कन्दरेषु ध्वनिः स्यात्
सङ्गीतार्थो ननु पशुपतेस्तत्र भावी समग्रः ॥५७॥

चतुर्थी । अलमिति पर्य्याप्त्यर्थग्रहणमिति भाष्यकारः । अव्यक्तं व्यञ्जयामास शिवः श्रीचरणद्वयम । हिमाद्रौ शाम्भवादीना सिद्धये सर्वकर्मणाम । दृष्ट्वा श्रीचरणं सम्यक साधक स्थिरयेत्तनुम । इत्याधीनशरीरो हि विचरेच्च जगत्त्रयमिति शम्भुरहस्ये ] ॥ ५६ ॥

शब्दायन्ते इति । ते मेघ । अनिलैः पूर्यमाणाः कीचका. वेणुविशेषाः [ वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धता इत्यमरः ] मधुर श्रुतिसुखं यथा तथा शब्दायन्ते शब्दं कुर्वन्ति [ शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे इति क्यङ् । अनेन वंशवाद्यसम्पत्तिकता ] संसक्ताभिः संयुक्ताभिः शब्दवाद्यानुषक्ताभिर्वा संरक्ताभिरिति पाठे संरक्तकण्ठीभिः इत्यर्थः किन्नरीभिः किन्नरस्त्रीभिः त्रयाणा पुराणां समाहारः त्रिपुरम । [ तद्धितार्थोत्तरपदेति समास. । पात्रादित्वात् नपुंसकत्वम् ]। तस्य विजयः गीयते कन्दरेषु दरीषु [ दरी तु कन्दरो वा स्त्रीत्यमरः । ते तव निर्ह्रादः मुरजे वाद्यभेदे ध्वनिः इव मुरजध्वनिः इव इत्यर्थः स्यात् चेत् तर्हि तत्र चरणसमीपे पशुपतेः नित्यं सन्निहितस्य शिवस्य सङ्गीतं सम्यक् गीतं तत् एव अर्थः सङ्गीतार्थः सङ्गीतवस्तु [ अर्थोऽभिधेयरैवस्तु प्रयोजननिवृत्तिष्वमरः ]।

प्रालेयाद्रेरुपतटमतिक्रम्य तांस्तान् विशेषान्
हंसद्वारं भृगुपतियशोवर्त्म यत् क्रौञ्चरन्ध्रम् ।
तेनोदीचीं दिशमनुसरेस्तिर्यगायामशोभी
श्यामः पादो बलिनियमनाभ्युद्यतस्येव विष्णोः ५८

समग्रः सम्पूर्णः भावी ननु भविष्यति खलु । भविष्यति गत्यादय इति भविष्यदर्थे णिनिः ॥ ५७ ॥

प्रालेयाद्रेरिति । प्रालेयाद्रेः हिमाद्रेः उपतटं तट-समीपे [ अव्ययं विभक्तीत्यादिना सामीप्यार्थेऽव्ययीभावः ]। तान् तान् [ वीप्सायां द्विरुक्तिः ]। विशेषान् द्रष्टव्यार्थान् [ विशेषोऽवयवे द्रव्ये द्रष्टव्योत्तमवस्तुनीति शब्दार्णवे ]। अतिक्रम्य अनुसरेः गच्छेः इति अनागतेन सम्बन्धः हंसानां द्वारं हंसद्वारम् । [मानसप्रस्थायिनो हंसाः क्रौञ्चरन्ध्रेण सञ्च-रन्ते इत्यागमः] । भृगुपतेः जामदग्न्यस्य यशोवर्त्म यशःप्रव-र्त्तिकारणमित्यर्थः यत् क्रौञ्चस्य पर्वतस्य रन्ध्रम् अस्ति तेन क्रौञ्च-विलेन बलेः दैत्यस्य नियमने बन्धने अभ्युद्यतस्य प्रवृत्तस्य विष्णोः व्यापकस्य त्रिविक्रमस्य श्यामः कृष्णवर्णः पादः इव तिर्यगायामेन तिरश्चीनदैर्घ्येण शोभते इति तथाविधः सन् उदीचीम् उत्तरां दिशम् अनुसरेः अनुगच्छ । [पुरा किल भगवती देवाद् धूर्जटेः धनुरप-नियदम् अधीयानेन भृगुनन्दनेन स्कन्दस्य मात्रया क्रौञ्च-शिखरिणम् अतिनिर्मितविभिन्नमुखेन हेलया स्वर्गि-णामेकं भिला ततः क्रौञ्चमेदारेव स्वयं स्वयम्भुवि वसि-

गत्वा चोर्ध्वं दशमुखभुजोच्छ्वासितप्रस्थसन्धेः
कैलासस्य त्रिदशवनितादर्पणस्यातिथिः स्याः ।
शृङ्गोच्छ्रायैः कुमुदविशदैर्यो वितत्य स्थितः खं
राशीभूतः प्रतिदिनमिव त्र्यम्बकस्याट्टहासः ॥५८॥
उत्पश्यामि त्वयि तटगते स्निग्धमिन्दाञ्जनाभे
सद्यःकृत्तद्विरददशनच्छेदगौरस्य तस्य ।
वपि यशःक्षीरनिधौ निखिलमपि जगज्जालम् आप्लावि-
र्नमिति कथा श्रूयते ] ॥५८॥

गत्वेति । क्रौञ्चविलनिर्गमनानन्तरम् ऊर्ध्वं च गत्वा दशमुखस्य रावणस्य भुजैः बाहुभिः उच्छ्वासिताः विश्लेषिताः प्रस्थानां सानूनां सन्धयः यस्य तस्य एतेन नयनकौतुकसद्भावः उक्तः । त्रिदश परिमाणम् एषाम् अस्तीति त्रिदशाः [संख्ययाव्ययेत्यादिना बहुव्रीहिः । बहुव्रीहौ संख्येये डजित्यादिना समासान्तो डच्प्रत्ययः] । त्रिदशानां देवानां वनिताः तासां दर्पणस्य [कैलासस्य स्फटिकत्वात् रजतत्वाद्वा बिम्बग्राहित्वेन इदमुक्तम्] । कैलासस्य अतिथिः स्याः यः कैलासः कुमुदविशदैः निर्मलैः शृङ्गाणाम् उच्छ्रायैः औन्नत्यैः खम् आकाशं वितत्य व्याप्य प्रतिदिनं दिने दिने राशीभूतः त्र्यम्बकस्य विलोचनस्य अट्टहासः अतिहासः इव स्थितः । [अट्टावतिशयश्चौमाविति यादवः । धावल्यात् हासत्वेन उत्प्रेक्षा । हासादीनां धावल्यं कविसमयसिद्धम् ] ॥५९॥

उत्पश्यामीति । स्निग्धं मसृणं भिन्नं मर्दितत्वं यत्

शोभामद्रेः स्तिमितनयनप्रेक्षणीयां भवित्रीम्
अंसन्यस्ते सति हलभृतो मेचके वाससीव ॥६०॥
क्षित्वा तस्मिन् भुजगवलयं शम्भुना दत्तहस्ता
क्रीडाशैले यदि च विचरेत् पादचारेण गौरी ।
भङ्गीभक्त्या विरचितवपुः स्तम्भितान्तर्जलौघः
सोपानत्वं कुरु मणितटारोहणायाग्रयायौ ॥६१॥

अञ्जन कज्जल तस्य आभा इव आभा यस्य तस्मिन् त्वयि तटगते सानुगते सति सद्यः क्षतस्य क्षिप्तस्य विदारदग्नस्य गजदन्तस्य छेदवत् गौरस्य धवलस्य तस्य अद्रेः कैलासस्य मेचके श्यामले [ कृष्णनीलासितश्यामकान्यश्याम इमे चका इत्यमरः ]। वाससि वस्त्रे अंसन्यस्ते सति हलभृतो बलभद्रस्य इव स्तिमिताभ्यां नयनाभ्यां प्रेक्षणीया शोभां भवित्रीं भाविनीम् उत्पत्स्यामि शोभा भविष्यतीति तर्कयामि इत्यर्थः। अत्रोत्प्रेक्षा अलङ्कारः ॥६०॥

क्षित्वेति । तस्मिन् क्रीडाशैले कैलासे [कैलासः कनकाद्रिश्च मन्दरो गन्धमादनः । क्रीडार्थं निर्मिताः शम्भोर्देवैः क्रीडाद्रयोऽभवन्निति शम्भुरहस्ये]। शम्भुना शिवेन भुजगः एव वलयः कङ्कण क्षित्वा गौर्याः भीतत्वात् त्यक्त्वा दत्तहस्ता सती गौरी पादचारेण विचरेत् यदि तर्हि अग्रयायी पुरोगतः तया स्तम्भितो घनीभाव प्राप्तः अन्तर्जलस्यौघः प्रवाहो यस्य स तथाभूतः [illegible] पर्वणा भक्त्या रचनया विरचितवपुः कल्पितशरीरः [illegible] मणीना

तत्रावश्यं वलयकुलिशोद्घट्टनोद्गीर्णतोयं
नेष्यन्ति त्वां सुरयुवतयो यन्त्रधारागृहत्वम्।
ताभ्यो मोक्षस्तव यदि सखे! धर्मलब्धस्य न स्यात्
क्रीडालोलाः श्रवणपरुषैर्गर्जितैर्भीषयेस्ताः ॥४२॥
हेमाम्भोजप्रसवि सलिलं मानसस्याददानः
कुर्वन् कामं क्षणमुखपटप्रीतिमैरावतस्य
तटं मणितटं तस्य रोहणाय सोपानत्वं कुरु सोपान-
भावं भजेत्यथः ॥ ४१ ॥

तत्रेति। तत्र कैलासेऽवश्यं नवेया सुरयुवतयः वलयकुलिशानि कङ्कणकोटयः [शतकोटिवाचिना कुलिशशब्देन कोटिमात्रं लक्ष्यते]। तैः उद्घट्टनानि प्रहाराः तैः उद्गीर्णं मुत्सृष्टं तोयं येन तं त्वां यन्त्रेषु धाराः यन्त्रधाराः तासां गृहत्वं कलिलधाराग्रहत्वं नेष्यन्ति प्रापयिष्यन्ति। हे सखे! मित्र। घर्मं निदाघे लब्धस्य [घर्मलब्धत्वञ्चास्य देवभूमिषु सर्वदा सर्वर्तुसमाहारात् प्रायिकसेवत्वाद्वा तथोक्तमागाढस्य प्रस्वेदस्य] तव ताभ्यः सुरयुवतिभ्यः मोक्षो न स्यात् यदि तदा क्रीडालोलाः क्रीडासक्ताः प्रमत्ताः तत्पराः ताः सुरयुवतीः श्रवणपरुषैः कर्णकटुभिः गर्जितैः करणैः भावयेः त्रासयेः। [अत्र हेत्वभावात् आत्मनेपदं युगागमश्च न] ॥ ४२ ॥

हेमेति। हे जलद! हेमाम्भोजानां प्रसवि जनकम् [शिष्टनीत्यादिना दुनिमित्तवः]। मानसस्य सरसः सलिलं आददानः पिबन् दूरार्थं, तथा ऐरावतस्य दन्त-

धुन्वन् कल्पद्रुमकिसलयान्यंशुकानीव वातै-
र्नानाचेष्टैर्जलद ! ललितैर्निर्विशेस्तं नगेन्द्रम् ॥ ६२ ॥
तस्योत्सङ्गे प्रणयिन इव स्रस्तगङ्गादुकूलां
न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन् ! ।

गजस्य कामचारित्वाद्वा शिवसेवार्थम् इन्द्रागमनाद्वा समागतस्य इति भावः, त्वयि जलदानकाले मुखे पटेन या प्रीतिः तां कुर्वन्, तथा कल्पद्रुमाणां किसलयानि पल्लवभूतानि अंशुकानि सूक्ष्मवस्त्राणि इव [ अंशुकं वस्त्रमात्रे स्यात् परिधानोत्तरीययोः । सूक्ष्मवस्त्रे नातिदीप्ताविति शब्दार्णवे ] । वातैः मेघवातैः धुन्वन्, नाना बहुविधाः चेष्टाः तोयपानादयः येषु तैः ललितैः क्रीडितैः [ नाभावभेदो स्त्रीनृत्ये ललित लिषु सुन्दरे । स्त्रियां प्रमदागारे क्रीडिते जातपल्लवे इति शब्दार्णवे ] । तं नगेन्द्रं कैलासं कामं यथेष्टं निर्विशेः समुपभुङ्क्ष्व [ निर्वेशो भृतिभोगयोरित्यमरः ] । यथेच्छविहारी मित्रगृहेषु मेत्रयाः फलं महज्जनसङ्गः तेन कैलासः मेघपर्वतयोः अभ्रसूर्ययोः अभ्रचन्द्रयोः शिखिजीमूतयोः समीरान्योः मित्रता स्वयमिति भावः ॥ ६२ ॥

तस्येति । प्रणयिनः प्रियतमस्य इव तस्य कैलासस्य उत्सङ्गे अङ्कभागे [ उत्सङ्गो मुक्तसंयोगे मध्यन्यूङ्कतलेऽपि चेति मालतीमाधवायाम् ] । गङ्गा दुकूलं शुभ्रवस्त्रम् इव उपमितमनाः [ दुकूलं सूक्ष्मवस्त्रे स्यादुत्तरीये सितांशुके इति शब्दार्णवे ] । अन्यत्र तु गङ्गा इव दुकूलं तत् स्रस्त

घा वः काले वहति सलिलोद्गारसुच्चैर्विमाना
भुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दम् ॥६४।

यस्याः तां तथोक्ताम् अलकां कुवेरनगरीं दृष्ट्वा कामिनीन् इवेति शेषः हे कामचारिन्। त्वं पुनः त्वं तु न ज्ञास्यसे इति न किन्तु ज्ञाप्यसे एव इत्यर्थः [कामचारिणस्ते पूर्वमपि बहुशत्वो दर्शनसम्भवाद्ज्ञानमसम्भावितमेवेति निश्चयार्थं नञ्द्वयप्रयोगः। तदुक्तं, स्मृतिनिश्चयसिद्धार्थेषु नञद्वयप्रयोग इति]। उच्चैर्विमानानि उन्नतानि सप्तभूमिकभवनानि [विमानोऽस्त्री देवयाने सप्तभूमौ च सङ्ख्यनीति यादवः]। तानि यस्यां सा [मेघसंवाहनस्थानसूचनार्थम् इदं विशेषणम्]। अन्यत्र विमाना निष्कोपा या अलका वो युष्माकं काले मेघकाले इत्यर्थः [कालस्य सर्वमेघसाधारण्यात् वः इति बहुवचनम्]। सलिलम् उद्गिरतीति सलिलोद्गारं स्रवत्सलिलधारम् इत्यर्थः अभ्रवृन्दं मेघकदम्बकं कामिनी स्त्री मुक्ताजालैः मौक्तिकसरैः ग्रथितं प्रत्युप्तम्। [पुंस्त्व्यां मौक्तिके मुक्तेति यादवः]। अलकम् इव चूर्णकुन्तलानि इव [जातावेकवचनम्। अलकाश्चूर्णकुन्तला इत्यमरः]। वहति बिभर्त्ति। [अत्र कैलासस्य अनुकूलनायकत्वम् अलकायाश्च स्वाधीनपतिकाख्यनायिकात्वं ध्वन्यते। एकायत्तोऽनुकूलः स्यादिति, प्रियोपलालिता नित्यं स्वाधीनपतिका मतेति च लक्षयन्ति उदाहरन्ति च लालयन् अलकप्रान्तान् रचयन् पत्रमञ्जरीम्। एकां विनोदयन् कान्तां छायावदनुवर्त्तते इति] ॥६४॥

इति पूर्वमेघः ।

# उत्तरमेघः

—०८;८८८—

विद्युत्वन्तं ललितवनिताः सेन्द्रचापं सचित्राः
सङ्गीताय प्रहतमुरजाः स्निग्धगम्भीरघोषम् ।
अन्तस्तोयं मणिमयभुवस्तुङ्गमभ्रंलिहाग्राः
प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः ॥१॥

विद्युत्वन्तमिति । यत्र अलकायां ललिताः रम्याः वनिताः स्त्रियो येषु ते तथोक्ताः चित्रभित्तिषु सचित्राः [ आलेख्याश्चर्य्ये चित्रमित्यमरः । तेन सहिता तुल्ययोग इति बहुव्रीहिः । वोपमज्जनस्येति सहशब्दस्य समासः] । सङ्गीताय तौर्य्यत्रिकाय प्रहतमुरजा ताडितमृदङ्गाः, मुरजा तु मृदङ्गे स्यात् ढक्यामुरजयोरपीति शब्दार्णवे । मणिमय्यः मणिविकाराः भुवो येषु ते तथोक्ताः, अभ्रंलिहानि अभ्रङ्कषाणि [वहाभ्रे लिह इति खशप्रत्ययः । अरुर्द्विषेत्यादिना समासः] । अग्राणि शिखराणि येषां ते तथोक्ताः अतितुङ्गाः इत्यर्थः, प्रासादाः देवगृहाणि [प्रासादो देवभूभुजामित्यमरः] । विद्युतः अस्य सन्तीति विद्युत्वन्तं सेन्द्रचापम् इन्द्रचापसहितं, स्निग्धः श्राव्यः गम्भीरः घोषः गर्जितं यस्य तम, अन्तः अन्तर्गतं तोयं यस्य तं तुङ्गम् उन्नतं त्वां तैः तैः विशेषैः ललितवनितत्वादिधर्मैः तुलयितुं समीकर्त्तुमलं पर्य्याप्ताः । [अलं भूषणपर्य्याप्तिवारणवाचकमित्यमरः । अत्र उप-

हस्ते लीलाकमलमलके बालकुन्दानुविद्धं
नीता लोध्रप्रसवरजसा पाण्डुतामानने श्रीः ।
चूडापाशे नवकुरवकं चारु कर्णे शिरीषं
सीमन्ते च त्वदुपगमजं यत्र नीपं बधूनाम् ॥२॥

मानोपमेयभूतमेघप्रासादधर्माणा विद्युद्वनितादीनां यथा-
सख्यमन्योन्यसादृश्यात् मेघप्रासादसादृश्यसिद्धिरिति विम्ब-
प्रतिविम्बभावेनैव पूर्णोपमा] ॥ १ ॥

सन्तति सर्वदा सर्वत्रुसम्मतिमाह हस्ते इति । यत्र अल-
कायां बधूनां स्त्रीणां हस्ते लीलार्थं कमल लीलाकमलं
[अवलिप्तमेतत । तदुक्तं, अरत् पङ्कजलक्षणेति] । अलके कुन्तले
[जातावेकवचनम्] अलकेषु इत्यर्थः. बालकुन्देः प्रथमाघ्य-
कुसुमैः. अनुविद्धम् अनुवेधः ग्रन्थनम् नपुंसके भावे क्तः ।
यद्यपि कुन्दानां शैशिरत्वम् अस्ति माघं कुन्दमित्यभि-
धानात् तथापि हेमन्ते प्रादुर्भावः शिशिरे प्रौढ़त्वमिति
व्यवस्थाभेदेन हेमन्तकार्यत्वमित्याशयेन बालविशेषणम् ।
अलकमित प्रथमान्तपाठे समसोक्तसभङ्गः स्यात् ।
नाथस्तु निबन्धनशिलताङ्कानिश्चेति [ दोषान्तरमाह तादृशत्
स्वभाव[illegible] मासां, निर्मितान्यलङ्कारणानि पातित-
मुखः[illegible] खण्डित इत्यादिषु प्रयोगेषु नपुंसकलिङ्ग-
तादर्थ्या[illegible] आनं. मुखे लोध्रप्रसवानां लोध्र
पुष्प[illegible] रजसा परागेण स्वाभाविके फले
पुष्पे प्रसिद्धे[illegible]न वर्ण इत्यमर । पाण्डु [illegible] श्वी.
शोभा[illegible] य [illegible] न कुं[illegible] [illegible]वयवेषु:

यत्रोन्मत्तभ्रमरमुखराः पादपा नित्यपुष्पा
हंसश्रेणीरचितरशना नित्यपद्मा नलिन्यः ।
केकात्कण्ठा भवनशिखिनो नित्यभास्वत्कलापा
नित्यज्योत्स्नाः प्रतिहततमोवृत्तिरम्या प्रदोषाः
॥३॥

क्वचिदिति । यत्र अलकायां पादपा वृक्षाः नित्यानि पुष्पाणि सुमनांसि येषां ते तथोक्ताः सन्तु भवन्तु इत्यादिकं वाक्यं पूर्ववत् । अत एव उन्मत्तभ्रमरमुखराः । नलिन्यः पद्मिन्यो नित्यानि पद्मानि यासां ताः सन्तु इत्यादि पूर्ववत् । अत एव हंसश्रेणीरचितरशनाः । केकात्कण्ठा मयूराः नित्यभास्वत्कलापाः नित्यं भास्वन्तः कलापाः बर्हाणि येषां ते तथोक्ताः सन्तु वर्षासु एव, अत एव केकात्कण्ठाः । प्रदोषाः रात्रयः नित्यज्योत्स्नाः नित्या ज्योत्स्ना यासां ताः सन्तु शुक्लपक्ष एव,

आनन्दोत्थं नयनसलिलं यत्र नान्यैर्निमित्तै-
र्नान्यस्मात् प्रणयकलहाद्विप्रयोगोपपत्तिः
वित्तेशानां न च खलु वयो यौवनादन्यदस्ति॥४९
यक्षाः यक्षाः सितमणिमयान्येत्य हर्म्यस्थलानि
ज्योतिश्छायाकुसुमरचितान्युत्तमस्त्रीसहायाः।
आसेवन्ते मधु रतिफलं कल्पवृक्षप्रसूतं
यत्रोन्मीलन्मदकलकलैः पुष्करेष्वाकुलेषु॥५॥

अतएव आनन्दात् हर्षात् जलसां हर्षजानां वार्त्तिः वेषां ते यक्षा रम्या-
श्चेति तथोक्तम्॥ ४॥

आनन्दोत्थमिति। यत्र अलकायां वित्तेशानां
यक्षाणां नयनसलिलं आनन्दोत्थं हर्षजं एव नयन-
सलिलं नान्यैर्निमित्तैः भवति। इष्टसंयोगेन
प्रियजनसङ्गमेन सम्भ्रमात् विप्रलम्भाय अलीकार्थं
कुसुमशयनात् महत्पुष्पशय्यातः यो भवति। प्रणय-
कलहात्तु प्रणयविशेषात् तु यो विरहप्राप्ति-
रपि नास्ति। तत्र दोषाद्दर्शनं वरी वार्द्धं नास्ति।
श्लोकद्वयं प्रति॥ ४॥

यस्मात् यस्मात् अलकायां यक्षाः देवयोनिवि-
शेषाः उत्तमस्त्रीसहायाः अतिशयाकुलसहचराः सन्तः
सितमणिमयान्येव स्फटिकमणिमयानि चन्द्रकान्तमयानि

मन्दाकिन्याः सलिलशिशिरैः सेव्यमाना मरुद्भि-
र्मन्दाराणामनुतटरुहां छायया वारितोष्णाः ।
अन्वेष्टव्यैः कनकसिकतामुष्टिनिक्षेपगूढ़ैः
संक्रीड़न्ते मणिभिरमरप्रार्थिता यत्र कन्याः ॥६॥

वा अत एव ज्योतिसां तारकाणां छायाः प्रतिबिम्बानि एव कुसुमानि तैः रचितानि परिष्कृतानि [ ज्योतिस्ता-राजिभाज्वालाहकुसुमार्चिता नर्वति वेजयन्ती । एतेन पानभूमिरम्लानश्रीरत्वेन दत्ता ] । हर्म्यस्थलानि एव प्राप्य त्वन्नभोरध्वनिः इव ध्वनिः तेषा तेषु पुष्करेषु वाद्यभाण्ड-मुखेषु पुष्कर करिहस्ताग्रे वाद्यभाण्डमुखे जलं इत्यमर ] । मनोः मन्दम आहतेषु सत्सु [ एतच्च नृत्यगीतयोरप्युपलक्ष-णम् ] कल्पद्रुप्रसूनं कल्पद्रुजन्य काङ्क्षितार्थप्रदत्वात् मध्वपि तत्र प्रसूत रति. फल यस्य तत् रतिफलाख्यं मधु मद्यम् आसेवन्ते आहृत्य पिबन्ति इत्यर्थः । [ लालचीरसितानृता-मलगुडौन्मत्तार्थिकालाक्षयादविन्द्रुममोरटेक्षुकदलीगुल्-प्रसूनैर्युतम् । इत्यजे नाधुपुष्पभङ्ग्यर्चित पुष्पद्रुमूलाहृतं काथेन स्मरदीपन रतिफलाख्यं स्याद् योनिं गाध इति मद्-रार्णवे ] ॥५॥

मन्दाकिन्या इति । यत्र अलकायाम् अमरप्रार्थिताः सुन्दर्यः इत्यर्थः कन्याः यक्षकुमार्यः [ अत्र कुमारीणां कन्या-र्योरिति विश्वः ] । मन्दाकिन्याः गङ्गायाः सलिलेन शिशिरैः शीतलैः मरुद्भिः सेव्यमानाः अत एव मन्दाराणां तटेषु रोहन्तीति अनुतटरुहः [ अत्र रुहः मक्षाराणां

नीवीबन्धोच्छ्वसितशिथिलं यत्र बिम्बाधराणां
क्षौमं रागादनिभृतकरेष्वाक्षिपत्सु प्रियेषु ।
अर्चिस्तुङ्गानभिमुखमपि प्राप्य रत्नप्रदीपान्
ह्रीमूढानां भवति विफलप्रेरणा चूर्णमुष्टिः ॥७॥

छायया अनातपेन वारितोष्णाः शमितातपाः सत्यः जनस्य गिरितास्तु मुष्टिभिः निक्षेपेण गूढेः संहतेः अत एव अन्वेष्टव्यैः जनैः मणिभिः रत्नैः संक्रीडन्ते गुप्तमणिसंज्ञया दंडकक्रीडया सम्यक् क्रीडन्ति इत्यर्थः । [क्रीडोऽनुसर्पणभ्रमणेत्यादिनपदम् । रत्नादिभिर्वालुकादौ गुप्तैर्दृष्टव्यकर्मभिः । कुमारीभिः कृता क्रीडा नाम्ना गुप्तमणिः स्मृता । गुप्तक्रीडा गूढमणिर्गुप्तकेलिस्तुलायनम् । पिण्डकन्दुकदण्डाभिः स्मृता दोषकवेलय इति शब्दार्णवे ]।६॥

नीवी ।। यत्र अलकायाम् अनिभृतकरेषु चपलहस्तेषु [अत्र नीवी वसनग्रन्थिः । नीवी परिषदे ग्रन्थौ स्त्रीणां रत्नसमुद्गके इत्यजयपालः इति विश्वः] । नीवी एव बन्धः नीवीबन्धः [ चूतप्रियङ्गुपीतरक्तस्थम ]। तस्य उच्छ्वसितेन त्रुटितेन शिथिलं क्षौमं दुकूलं रागात् आक्षिपत्सु आहरत्सु सत्सु क्षौमूढानां लज्जाविधुराणां बिम्बं बिम्बिकाफलम् । [बिम्बं फलं बिम्बिकायाः प्रतिबिम्बे च मण्डले इति विश्वः ]। बिम्बम इव अधरो यासां तासां बिम्बाधराणां स्त्रीविशेषाणाम् [ विशेषाः कामिनी कान्ता भीरुर्बिम्बाधराङ्गनेति शब्दार्णवे ]। चूर्णस्य कुङ्कुमादेः मुष्टिः चर्चिभिः मयूखैः तुङ्गान् [ अर्चिर्मयूखशिखयोरिति विश्वः ]। रत्नानि एव

**नेत्रा नीताः सततगतिना यद्विमानाग्रभूमौ-**
**रालेख्यानां सजलकणिकाटोषमुत्पाद्य सद्यः ।**
**शङ्कास्पृष्टा इव जलमुचस्त्वादृशा यत्र जालै-**
**र्धूमोद्गारानुकृतिनिपुणा जर्जरा निष्पतन्ति ॥ ८ ॥**

प्रदीपान् अभिमुखं यथा तथा प्राप्य अपि विफलप्रेरणा दीपनिर्वाणाच्चमत्वात् निष्फला भवति । [अत्राङ्गनानां रत्नप्रदीपनिर्वाणप्रवृत्त्या मौग्ध्यं व्यज्यते] ॥ ७ ॥

नेत्रेति । हे मेघ । नेत्रा प्रेरकेण सततगतिना सदा-गतिना वायुना [मातरिश्वा सदागतिरित्यमरः] । यद्वि-मानाग्रभूमीः यस्याः अलकायाः विमानानां सप्तभूमि-कभवनानाम् अग्रभूमीः उपरिभूमिकाः नीताः प्रापिताः त्वाम् इव पश्यन्ति इति तादृग्याः त्वत्सदृश्याः इत्यर्थः [ त्यदादिषु दृशोऽनालोचने कञ् चेति कञ्प्रत्ययः ] । जलमुचः मेघाः आलेख्यानां सच्चित्राणाम् । [ चित्रं लिखितरूपाढ्यं स्यादालेख्यन्तु यद्वत इति शब्दार्णवे ] । स्वस्य जलकणिकाभिः जलकणैः दोषं स्फोटनम् उत्पाद्य सद्यः शङ्कास्पृष्टाः इव सापराधत्वात् भयाविष्टाः इव [शङ्का वितर्कभययोरिति शब्दार्णवे ] । धूमोद्गारस्य धूमनिर्गमस्य अनुकृतौ अनुकरणे निपुणाः कुशलाः जर्जराः विशीर्णाः सन्तः जालमार्गैः गवाक्षरन्ध्रैः निष्पतन्ति निष्क्रामन्ति । [यथा कैनचित् अन्तःपुरसञ्चारवता दूतेन गूढवृत्त्या रहस्य-भूमिं प्रापिताः तत्र स्त्रीणां व्यभिचारदोषमुत्पाद्य, सद्यः

यत्र स्त्रीणां प्रियतमभुजोच्छ्वासितालिङ्गितानाम्
अङ्गग्लानिं सुरतजनितां तन्तुजालावलम्बाः।
त्वत्संरोधापगमविशदैश्चन्द्रपादैर्निशीथे
व्यालुम्पन्ति स्फुटजललवस्यन्दिनश्चन्द्रकान्ताः ॥ ८

अत्रयान्तर्भवननिधयः प्रत्यहं रक्तकण्ठै-
रुद्गायद्भिर्धनपतियशः किन्नरैर्यत्र सार्द्धम्।
साभ्रङ्गाः क्लृप्तविभ्रान्तराः जारः क्षुद्रमार्गैर्निष्क्रामन्ति
तद्दर्शिते ध्वानः। प्रकृतार्थे भङ्गासृष्टा इवेत्युत्प्रेक्षा ॥ ८ ॥

यत्रेति। यत्र अलकायां निशीथे अर्द्धरात्रे [अर्द्ध-रात्रनिशीथा द्वावित्यमरः]। त्वत्संरोधस्य मेघावरणस्य अपगमेन विशदैः निर्मलैः चन्द्रपादैः चन्द्रमरीचिभिः [पादा रश्म्यङ्घ्रितुर्यांशा इत्यमरः]। स्फुटजललवस्य-न्दिनः उल्बणाम्बुकणस्राविणः तन्तुजालावलम्बाः वितान-लम्बिसूत्रपुञ्जाधाराः तद्गुणगुम्फिताः इत्यर्थः चन्द्रकान्ताः चन्द्रकान्तमणयः प्रियतमानां भुजैः उच्छ्वासितानि श्रान्त्या जलसेकाय वा शिथिलितानि आलिङ्गनानि यासां तासां स्त्रीणां सुरतजनिताम् अङ्गग्लानिम् अवयवानां ग्लानतां व्यालुम्पन्ति अपनुदन्ति ॥ ८॥

अत्रयेति। यत्र अलकायां वेतं मक्षाः क्षयाः [क्षय्यजय्यौ मक्षार्थे इति निपातः, ततो नञ्समासः]। भवनानाम् अन्तः अन्तर्भवनम् [अव्यय विभक्तीत्यादिना अव्ययीभावः]। अत्रयाः अन्तर्भवने निधयो येषां ते

वभ्राजाख्यं विबुधवनितावारमुख्यासहायाः
बद्धालापा: वहिरुपवनं कामिनो निर्विशन्ति ॥१०
गत्युत्कम्पादलकपतितैर्यत्र मन्दारपुष्पैः
पत्रच्छेदैः कनककमलैः कर्णविभ्रंशिभिश्च ।
मुक्ताजालैः स्तनपरिसरच्छिन्नसूत्रैश्च हारै-
र्नैशो मार्गः सवितुरुदये सूच्यते कामिनीनाम्॥११

तथोक्ताः [यक्षे-ऽभी-असम्भावनार्थमिदं विशेषणं] विबुध-वनिताः अप्सरसः ता एव वारमुख्याः वेश्याः ता एव सहाया. येषां ते तथोक्ताः [वारस्त्री गणिका वेश्या रूपाजीवांध सा जने: । सत्कृता वारमुख्या स्यादित्यमरः । बद्धालापाः सम्भावितसंलापाः कामिनः कामुकाः प्रत्यहम् अहनि अहनि [अव्ययं विभक्तीत्यादिना समासः] । रक्तः मधुरः कलः कण्ठध्वनिः येषां ते तैः सुन्दरकण्ठध्वनिभिः धनपतियशः कुबेरकीर्तिम् उद्गायद्भिः उच्चैर्गायद्भिः देवगानस्य गान्धारग्रामजात् तारतर गायद्भिः इत्यर्थः किन्नरैः सार्धं सह विभ्राजस्य इदं वैभ्राज वैभ्राजम् इति आख्या यस्य तत् वैभ्राजाख्यम् [विभ्राजेन गन्धर्वेण जातं वैभ्राजमाख्यमिति मल्लिनाथे । चैत्ररथस्य नामान्तरमेतत् । वहिरुपवन बाह्योद्यानं निर्विशन्ति अनुभवन्ति ॥१०॥

गत्युत्कम्पादिति । यत्र अलकायां कामिनीनाम् अभिसारिकाणां निशि भवः नैशः मार्गः सवितुः उदये सति गत्या गमनेन उत्कम्पः चलनं तस्मात् हेतोः अलकेभ्यः पतितैः मन्दारपुष्पैः सुरतकुसुमैः तथा पत्राणां पत्र-

मत्वा देवं धनपतिसखं यत्र साक्षाद्वसन्तं
प्रायश्चापं न वहति भयान्मन्मथः षट्पदज्यम्।
सभ्रूभङ्गप्रहितनयनैः कामिलक्ष्येष्वमोघैः
तस्यारम्भश्चतुरवनिताविभ्रमैरेव सिद्धः ॥१२॥

लतानां छिदैः खण्डैः पतितैः इति शेषः तथा कर्णेभ्यः विभ्रंश्यन्ति इति कर्णविभ्रंशीनि तैः कमनस्य कमलैः [षष्ठ्या विवक्षितार्थलाभे सति मयटा विग्रहे अध्याहारदोषः, एवमन्यत्राप्यनुसन्धेयम्]। तथा मुक्ताजालैः मौक्तिकसरैः शिरोनिहितैः इत्यर्थैः तथा स्तनयोः परिसरः प्रदेशः तत्र छिन्नानि सूत्राणि येषां तैः हारैश्च सूच्यते ज्ञाप्यते मार्गः पतितनन्दारकुसुमादिलिङ्गैः अयमभिसारिकाणां पन्थाः इत्यनुमीयते इत्यर्थः ॥११॥

मत्वेति। यत्र अलकायां मन्मथः कामः धनपतेः कुबेरस्य सखा धनपतिसखः [राजाहःसखिभ्यष्टच्]। तं देवं महादेवं साक्षात् वसन्तं सखिस्नेहात् निजरूपेण वसन्तं वर्त्तमान मत्वा ज्ञात्वा भयात् भालेक्षणभयात् षट्पदाः एव ज्या मौर्वी यस्य तं चापं प्रायः प्राचुर्य्येण न वहति न बिभर्त्ति। अयं तर्हि तस्य कार्य्यसिद्धिः अत आह सभ्रूभङ्गेति तस्य मन्मथस्य आरम्भः कामिजनविजयव्यापारः सभ्रूभङ्गं प्रहितानि प्रयुक्तानि नयनानि दृष्ट्वा येषु तैः तथोक्तैः कामिनः एव लक्ष्याणि तेषु अमोघैः सफलप्रयोगैः इत्यर्थः [मन्मथचापोऽपि क्वचिदपि मोघः स्यादिति भावः] चतुराश्च ताः वनिताश्च तासां विभ्रमैः

वासश्चित्रं मधु नयनयोर्विभ्रमादेशदक्षं
पुष्पोद्भेदं सह किसलयैर्भूषणानां विकल्पान् ।
लाक्षारागं चरणकमलन्यासयोग्यञ्च यस्याम्
एकः सूते सकलमबलामण्डनं कल्पवृक्षः ॥१३।
तत्रागारं धनपतिगृहानुत्तरेणास्मदीयं

विलासैः एव सिद्धः निष्पन्नः । यत् अनर्थकरं पाक्षिक-फलञ्च तत्प्रयोगाद् वरं निश्चितसाधनप्रयोगः इति भावः ॥ १२ ॥

[ कचधार्य्यं देहधार्य्यं परिधेयं विलेपनम् । चतुर्धा भूषणं प्राहुः स्त्रीणामन्यच्च दैशिकमिति रत्नाकरे ] तदेतदाह वास इति । यस्याम् अलकायां चित्रं नानावर्णं वासः वसनं परिधेयमण्डनमेतत् नयनयोः विभ्रमाणाम् आदेशे उपदेशे दक्षम् अनेन विभ्रमद्वारा मधुनो मण्डनत्वम् अनुसन्धेयं तच्च मण्डनादिवत् देहधार्य्येऽन्तर्भाव्यं मधु मद्यं किसलयैः पल्लवैः सह पुष्पोद्भेदम् उभयञ्चेत्यर्थः इदं तु कचधार्य्यं भूषणानां विकल्पान् विशेषान् देहधार्य्यमेतत् तथा चरणकमलयोः न्यासस्य समर्पणस्य योग्यं रज्यते अनेन इति रागः रञ्जकद्रव्यं लाक्षा एव रागः तं लाक्षारागम् इदञ्च अङ्गरागादिविलेपनमण्डनोपलक्षणं सकलं सर्वं चतुर्विधम् अपि इत्यर्थः अबलामण्डनं योषित्प्रसाधनजातम् एकः कल्पवृक्षः एव सूते जनयति नतु नानासाधनसम्पादनप्रयास इत्यर्थः ॥ १३ ॥

इत्यलकां वर्णयित्वा तव स्वभवनस्य अभिज्ञानमाह

दूरालक्ष्यं सुरपतिधनुश्चारुणा तोरणेन ।
यस्योपान्ते कृतकतनयः कान्तया वर्द्धितो मे
हस्तप्राप्यस्तवकनमितो बालमन्दारवृक्षः ॥१४॥
वापी चास्मिन् मरकतशिलाबद्धसोपानमार्गा
हैमैश्छन्ना विकचकमलैः स्निग्धवैदूर्यनालैः ।

तत्रेति । तत्र अलकायां धनपतिगृहान् कुबेरगृहान् उत्तरेण उत्तरस्मिन् अदूरदेशे [ एनवन्यतरस्यामदूरेऽपञ्चम्या इत्येनप्प्रत्ययः । एनपा द्वितीयेति द्वितीया ] [ गृहाः पुंसि च भूम्न्येव इत्यमरः ] । अस्माकम् इदम् अस्मदीयम् [ बद्धाच्छ इति छप्रत्ययः ] । आगारं गृहं सुरपतिधनुश्चारुणा मणिमयत्वात् अभ्रङ्कषत्वात् च इन्द्रचापसुन्दरेण तोरणेन बहिर्द्वारेण दूरात् लक्ष्यं दृश्यम् अनेन अभिज्ञानेन दूरत एव ज्ञातुं शक्यम् इत्यर्थः । अभिज्ञानान्तरमाह, यस्य आगारस्य उपान्ते प्राकारान्तःपार्श्वदेशे मे मम कान्तया वर्द्धितः पोषितः कृतकतनयः कृत्रिमसुतः पुत्रत्वेन अभिमन्यामान इत्यर्थः हस्तप्राप्यैः हस्तावचेयैः स्तवकैः गुच्छैः नमितः [ स्याद्गुच्छकस्तु स्तवक इत्यमरः ] बालो मन्दारवृक्षः कल्पवृक्षः अस्ति इति शेषः ॥१४॥

इतः पञ्चभिः श्लोकैरभिज्ञानान्तरमाह वापीति । अस्मिन् मदीयागारे मरकतशिलाभिः बद्धः सोपानमार्गः यस्याः सा तथोक्ता, विदूरे भवाः वैदूर्य्याः [ विदूराञ्ञ्य इति ञ्यप्रत्ययः ] । वैदूर्य्याणां विकाराः वैदूर्य्याणि

यस्यास्तोये कृतवसतयो मानसं सन्निकृष्टं
नाध्यास्यन्ति व्यपगतशुचस्त्वामपि प्रेक्ष्य हंसाः
॥१५॥
तस्यास्तीरे रचितशिखरः पेशलैरिन्द्रनीलैः
क्रीडाशैलः कनककदलीवेष्टनप्रेक्षणीयः ।
मद्गेहिन्याः प्रिय इति सखे ! चेतसा कातरेण
प्रेक्ष्योपान्तस्फुरिततडितं त्वां तमेव स्मरामि १६

[ विकारार्थे अन्प्रत्ययः ] । स्निग्धानि वैदूर्याणि नालानि येषां तैः हैमैः सौवर्णैः विकचकमलैः कृत्वा वापी च अस्ति इति शेषः, यस्याः वाप्याः तीरे कृतवसतयः कृतनिवासाः हंसाः त्वां मेघं प्रेक्ष्य अपि व्यपगतशुचः वर्षाकालेऽपि व्यपगतकलुषजलत्वात् वीतदुःखाः सन्तः सन्निकृष्टं सन्निहितं सुगमम् अपि इत्यर्थः मानसं मानससरः नाध्यास्यन्ति नोत्कण्ठिष्यन्ति । आध्यानमुत्कण्ठास्मरणमिति कामिकायाम् ॥ १५ ॥

तस्याः इति । तस्याः वाप्याः तीरे पेशलैः चारुभिः [ चारौ दक्षे च पेशल इत्यमरः ] । इन्द्रनीलैः रचितशिखरः इन्द्रनीलमणिमयशिखर इत्यर्थः कनककदलीनां वेष्टनेन परिवृता प्रेक्षणीयः दर्शनीयः क्रीडाशैलः अस्ति इति शेषः । हे सखे । उपान्तेषु प्रान्तेषु स्फुरिताः तडितः यस्य तं तथोक्तम् [इदं विशेषणं कदलीसाम्यार्थम् उक्तम् इन्द्रनीलसाम्यं तु मेघस्य स्वाभाविकम् इत्यनेन सूच्यते] त्वां

रक्ताशोकश्चलकिसलयः केसरश्चाच कान्तः
प्रत्यासन्नौ कुरवकवृतेर्माधवीमण्डपस्य ।
एकः सख्यास्तव सह मया वामपादाभिलाषी
काङ्क्षत्यन्यो वदनमदिरां दोहदच्छद्मनास्याः ॥१७

प्रेक्ष्य मन्नेहिन्याः प्रियः इति हेतोः तस्य शैलस्य मदृग्रहिणीप्रियत्वात् हेतोः इत्यर्थः कातरेण भीतेन चेतसा भयश्चात्र सानन्दमेव । [ वस्तूनामनुभूतानां तुल्यश्रवणदर्शनात् । श्रवणात् कीर्त्तनाद्वापि मानन्दा भीर्यथा भवेदिति रत्नाकरे दर्शनात् ]। तम एव क्रीड़ाशैलम् एव स्मरामि एवकारो विषयान्तरव्यवच्छेदार्थः सदृशवस्त्वनुभावात् इष्टार्थस्मृतिर्जायते इत्यर्थः । [अतएवात्र स्मरणाख्यो अलङ्कारः तदुक्तं सदृशानुभवादन्यस्मृतिः स्मरणमुच्यते इति । निरुक्तकारस्तु त्वां तमेव स्मरामीति योजयित्वा मेघे शैलत्वारोपम् आचष्टे तद् असङ्गतम् अद्रयाकारारोपस्य पुरोवर्त्तिन्यनुभवात्मकत्वेन स्मरतिशब्दप्रयोगायोगात् शैलत्वभावना स्मृतिरित्यपि नोपपद्यते भावनायाः स्मृतित्वे प्रमाणाभावात् अनुभवायोगात् सादृश्योपन्यासवैयर्थ्याच्च विसदृशेऽपि शालग्रामे हरिभावनादर्शनादिति] ॥ १६ ॥

रक्तेति । अत्र क्रीड़ाशैले कुरवकाः एव हृतिः आवरणं यस्य तस्य मधौ वसन्ते भवाः माधव्यः तासां मण्डपः तस्य अतिमुक्तलताग्रहस्य [ अतिमुक्तः पुण्ड्रकः स्याद्वासन्ती माधवीलतेत्यमरः ]। प्रत्यासन्नौ तन्निकृष्टौ चलकिसलयः चञ्चलपल्लवः [अनेन हर्षस्य पादताड़नेषु प्राञ्जलित्वं व्यज्यते]

तन्मध्ये च स्फटिकफलका काञ्चनी वासयष्टि-
र्मूले बद्धा मणिभिरनतिप्रौढवंशप्रकाशैः ।

रक्ताशोकः रक्तविशेषणं तस्य स्मरोद्दीपकत्वात् उक्तम । [ प्रसूनकैरशोकस्तु श्वेतो रक्त इति द्विधा । बहुमिर्द्वि-करः श्वेतो रक्तोऽत्र स्मरवर्द्धन इत्यशोककल्पे दर्शनात् ] । कान्तः कमनीयः केसरः वकुलश्च [ अथ केसरे वकुल इय-मरः ] । स्त इति शेषः । एकः तयोरन्यतरः प्राथमिकत्वाद् अशोक इत्यर्थः मया सह तव सख्याः प्रियायाः इत्यर्थः । वामपादाभिलाषी दोहदच्छद्मनेति अत्रापि सम्बन्धनीयं स च अहं च अभिलाषाव इत्यर्थः अन्यः केसरः दोहद हेत्वादीनां प्रसवकारणं संस्कारद्रव्यम् [ तरुगुल्म-लतादीनामकाले कुसुमेः कृतम् । पुष्पाद्युत्पादकं द्रव्यं दोहदं स्यात् तु तत्क्रियेति शब्दार्णवे ] । छद्मना व्याजेन [ कपटोऽस्त्री व्याजदम्भोपधयश्छद्म कैतवे इत्यमरः ] । अस्याः तव सख्याः वदनमदिरां गण्डूषमद्यं काङ्क्षति मद्या सहेति अत्रापि सम्बन्धनीयम् । [अशोकवकुलयोः स्त्रीपादताड़नगण्डूषमदिरे दोहदमिति प्रसिद्धिः । स्त्रीणां सम्पर्कात् प्रियङ्गुर्विकसति बकुलः शीधुगण्डूषसेकात् पादा-घातादशोकस्तिलकतरुरचौ वीक्षणालिङ्गनाभ्याम् । मन्दा-रो नर्मवाक्यात् पटुमृदुहसनाच्चम्पको वक्त्रवातात् चूतो गीतादमेरुर्विकसति च पुरो नर्त्तनात् कर्णिकारः ] ॥१७॥

तन्मध्ये इति । किञ्चेति चार्थः तन्मध्ये तयोर्द्वयो-र्मध्ये अनतिप्रौढ़ानाम् अनतिकठोराणां वंशानां प्रकाश्यः

तालैः शिञ्जावलयसुभगैः नर्तितः कान्तया मे
यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद् वः
॥१८॥

एभिः साधो ! हृदयनिहितैर्लक्षणैर्लक्षयेथाः
द्वारोपान्ते लिखितवपुषौ शङ्खपद्मौ च दृष्ट्वा ।

इत्र प्रकाशो येषां तैः तरुणवेणुसच्छायैः मणिभिः मरकत-
शिलाभिः मूले बद्धा ज्ञतवेदिकेत्यर्थः स्फटिकं स्फटिकमयं
फलकं पीठं यस्याः सा काञ्चनस्य विकारः काञ्चनी सौवर्णी
वासयष्टिः निवासदण्डः अस्तीति शेषः शिञ्जा भूषणध्वनिः
[भूषणानान्तु शिञ्जितमित्यमरः । भिदादित्वादङ् ।
शिञ्जिधातुरयं तालव्यादिः न तु दन्त्यादिः ]। शिञ्जा-
प्रधानानि वलयानि तैः सुभगाः रम्याः तैः तालैः करतल-
वादनैः मम कान्तया नर्तितः वो युष्माकं सुहृत् सखा
नीलकण्ठः मयूरः [मयूरो वर्हिणो वर्ही नीलकण्ठो भुज-
ङ्गभुगित्यमरः ]। दिवसविगमे सायंकाले यां यष्टिकाम्
अध्यास्ते यष्ट्याम् आस्ते इत्यर्थः [अधिशीङ्स्थासां कर्मेति
कर्मत्वात् द्वितीया ] तत्रागारमित्यारभ्य पञ्चसु श्लोकेषु
समृद्धवस्तुवर्णनादुदात्तालङ्कारः । तदुक्तं, तदुदात्तं भवेद् यत्र
समृद्धं वस्तु वर्ण्यते इति । न चैषा स्वभावोक्तिर्भाविकं वा
तत्र यथास्थितवस्तुवर्णनात् अत्र तु कविप्रतिभोत्थापित-
सम्भाव्यमानैश्वर्यशालिवस्तुवर्णनाद् आरोपितविषयत्वमिति
ताभ्यामस्य भेद इत्यलङ्कारसर्वस्वकारः] ॥१८॥

एभिरिति । हे साधो ! निपुण ! [साधुः समर्थो निपुणो

**श्यामच्छायं भवनमधुना मद्वियोगेन नूनं**
**सूर्य्यापाये न खलु कमलं पुष्यति स्वामभिख्याम्**
**॥१९॥**

**गत्वा सद्यः कलभतनुतां शीघ्रसम्पातहेतोः**
**क्रीडाशैले प्रथमकथिते रम्यसानौ निषण्णः।**
**अर्हस्यन्तर्भवनपतितां कर्त्तुमल्पाल्पभासं**
**खद्योतालीविलसितनिभां विद्युदुन्मेषदृष्टिम्॥२०**

वेति काश्चिकायाम्]। हृदयनिहितैः अविस्मृतैरित्यर्थः एभिः पूर्वोक्तैः लक्षणैः तोरणादिभिरभिज्ञानैः द्वारोपान्ते एकवचनमविवक्षितं द्वारपार्श्वयोरित्यर्थः लिखिते वपुषी आकृती ययोः तौ तथोक्तौ शङ्खपद्मौ नाम निधिविशेषौ [निधिर्नौ शेवधिर्भेदाः पद्मशङ्खादयो निधेरित्यमरः]। दृष्ट्वा च नूनं सत्यम् अधुना इदानीम् [अधुनेति निपातः]। मद्वियोगेन मम प्रवासेन श्यामच्छायम् उत्सवोपरमात् क्षीणकान्ति भवनं मद्गृहं लक्षयेथाः निश्चिनुयाः तथाहि सूर्य्यापाते सति कमलं पद्मं स्वाम् आत्मीयाम् अभिख्यां शोभाम् [अभिख्या नामशोभयोरित्यमरः]। न पुष्यति न उपचिनोति खलु सूर्य्यविरहितं पद्ममिव पतिविरहितं गृहं न शोभते इत्यर्थः ॥१९॥

निजगृहनिश्चयानन्तरञ्जत्यमाह, गत्वेति। हे मेघ! शीघ्रसम्पात एव हेतुः तस्य शीघ्रप्रवेशार्थमित्यर्थः [षष्ठी हेतुप्रयोगे इति षष्ठी। सम्पातः पतने वेगे प्रवेशे वेदसं-

तन्वी श्यामा शिखरिदशना पक्वबिम्बाधरोष्ठी ।
मध्ये क्षामा चकितहरिणीप्रेक्षणा निम्ननाभिः

विटे इति शब्दार्णवे]। सद्यः सपदि कलभस्य करिपोतस्य तनुरिव तनुर्यस्य तस्य भावः ताम् अल्पशरीरतां गत्वा प्राप्य प्रथमकथिते तस्यास्तीरे इत्यादिना पूर्वोद्दिष्टे रम्य-सानौ निषदनयोग्ये इत्यर्थः क्रीड़ाशैले निषण्णः उपविष्टः सन् अल्पाल्पा अल्पप्रकारा भाः प्रकाशो यस्याः ताम् [प्रकारे गुणवचनस्येति द्विरुक्तिः]। खद्योतानाम् आली तस्या विलसितेन स्फुरितेन निभां समानां विद्युदुन्मेषः विद्युत् प्रकाशः स एव दृष्टिः तां भवनस्यान्तः अन्तर्भवनं तत्र पतितां प्रविष्टां कर्त्तुम् अर्हसि यथा कश्चित् किञ्चिदन्वि-ष्यन् क्वचिदुच्चते स्थित्वा शनैः शनैरतितरां द्राघीयसीं दृष्टिम् इष्टदेशे पातयति तद्वदित्यर्थः ॥२०॥

सम्प्रति दृष्टिपातं कृतवतोऽस्याभिज्ञानं श्लोकद्वयेनाह, तन्वीति। तन्वी कृशाङ्गी न तु पीवरी- [श्लक्ष्णं दभ्रं कृशं तनु इत्यमरः। वोतो गुणवचनादिति ङीष्]। श्यामा युवतिः [श्यामा यौवनमध्यस्था इत्युत्पलमालायाम्]। शिखराणि एषां सन्तीति शिखरिणः कोटिमन्तः [शिखरं शैलहृच्चाग्रकक्षापुलककोटिष्विति विश्वः]। शिखरिणः दशनाः दन्ताः यस्याः सा एतेनास्या भाग्यवत्त्वं प्रत्यासुष्क-रत्वञ्च सूच्यते [तदुक्तं सामुद्रिके स्निग्धाः समानरूपाः सुपङ्-क्तयः शिखिनः स्निष्टाः। दन्ता भवन्ति यासां तासां पादे जगत् सर्वम्। ताम्बूलरसरक्तोऽपि स्फुटभासः समोदयाः।

**श्रोणीभाराद्दलसगमना स्तोकनम्रा स्तनाभ्यां**
**या तत्र स्याद्द युवतिविषये सृष्टिराद्येव धातुः २१**

यस्याः शिखरिणो दन्ता दीर्घं जीवति तत्परिरिति]। पक्वं परिणतं विम्बं विम्बिकाफलमिव अधरोष्ठो यस्याः सा पक्वविम्बाधरोष्ठी [शाकपार्थिवादित्वान्मध्यपदलोपी समास इति वामनः। नासिकोदरोष्ठेत्यादिना ङीष]। मध्ये क्षामा कृशोदरीत्यर्थः चकितहरिण्या. प्रेक्षणानीव प्रेक्षणानि दृष्टयो यस्याः सा तथोक्ता एतेनास्याः पद्मिनीत्वं व्यज्यते [तदुक्तं रतिहरस्ये पद्मिनीलक्षणप्रस्तावे चकितमृगदृशाभे प्रान्तरक्ते च नेत्रे इति]। निम्ननाभिः गम्भीरनाभिः अनेन नारीणा नाभिगाम्भीर्य्यान्मदनातिरेक इति कामसूत्रार्थः सूच्यते। श्रोणीभारात् अलसगमना मन्दगामिनी न तु जघनदोषात् स्तनाभ्या स्तोकनम्रा ईषदवनता न तु वपुर्दोषात् युवतय एव विषय. तस्मिन् युवतिविषये युवतीरधिकृत्येत्यर्थः धातु. ब्रह्मणः आद्या सृष्टिः प्रथमशिल्पमिव स्थिता इत्युत्प्रेक्षा प्रथमनिर्मिता युवतिरियमेवंरूपः प्रायेण शिल्पिनां प्रथमनिर्माणे प्रयत्नातिशयवशात् शिल्पनिर्माणसौष्ठवं दृश्यते इत्याद्यविशेषण तथाच अस्मिन् प्रपञ्चे न कुत्राप्येवविधरामणीयकं रमणीरत्नमस्तीति भावः तदेवम्भूता या स्त्री तदान्तर्भवने स्यात् तत्र निवसेदित्यर्थः नाम इत्युत्तरश्लोकेन सम्बन्धः ॥२१॥

तां जानीथाः परिमितकथां जीवितं मे द्वितीयं
दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम् ।
गाढोत्कण्ठां गुरुषु दिवसेष्वेषु गच्छत्सु बालां
जातां मन्ये शिशिरमथितां पद्मिनीं वान्यरूपाम्
॥२२॥

नूनं तस्याः प्रबलरुदितोच्छूननेत्रं प्रियायाः

तामिति । सहचरे सहचारिणि अनेन वियोगासहिष्णुत्वं व्यज्यते मयि दूरीभूते दूरस्थिते सति सहचरे चक्रवाके दूरीभूते सति चक्रवाकीं चक्रवाकबधूमिव [जातेरस्त्रीविषयादयोपधादिति ङीष् ]। परिमितकथां मितभाषिणीम् एकाम् एकाकिनीं स्थितां ताम् अन्तर्भवनगतां मे द्वितीयं जीवितं जानीथाः जीविततुल्यां मत्प्रेयसीमवगच्छेरित्यर्थः तन्वीत्यादि पूर्वलक्षणैरिति शेषः । लक्षणानामन्यथाभावभ्रममाशङ्क्याह गाढोत्कण्ठामिति गाढोत्कण्ठां प्रबलविरहवेदनाम् [रागे त्वलब्धविषये वेदना महती तु या । संश्लेषणे तु गात्राणां तामुत्कण्ठां विदुर्बुधा इत्यभिधानात् ]। बालां गुरुषु विरहमहत्सु एषु वर्त्तमानेषु दिवसेषु गच्छत्सु सत्सु शिशिरेण शिशिरकालेन मथितां पद्मिनीं वा पद्मिनीमिव [इव वद्वा युथाशब्दाविति दण्डी]। अन्यरूपां पूर्वविपरीताकारां जातां मन्ये हिमहतपद्मिनीव विरहेण अन्याहशी जातेति तर्कयामीत्यर्थः । एतावता नेयमन्येति भ्रमितव्यमिति भावः ॥२२॥

नूनमिति । प्रबलरुदितेन उच्छूने स्फुटितपुटे नेत्रे

निःश्वासानामशिशिरतया भिन्नवर्णाधरोष्ठम् ।
हस्तन्यस्तं मुखमसकलव्यक्ति लम्बालकत्वाद्
इन्दोर्दैन्यं त्वदनुसरणक्लिष्टकान्तेर्बिभर्त्ति ॥२३
आलोके ते निपतति पुरा सा बलिव्याकुला वा
मत्सादृश्यं विरहतनु वा भावगम्यं लिखन्ती ।

यस्य तत् [उच्छूनेति श्वयतेः कर्त्तरि क्तः आदितश्चेति निष्ठानत्वं वचिस्वपीत्यादिना सम्प्रसारणं सम्प्रसारणाच्चेति पूर्वरूपत्वं हल इति दीर्घः । छोः शूडनुनासिके चेति जडादेशे कृते रूपसिद्धिरिति वर्त्तमानसामीप्यप्रक्रिया प्रामादिकीत्युत्प्रेक्षा तथा सति धातोरिकारस्य गत्यभावात् जडादेशे छोरल्पत्वेन विशेषणाच्चेति ]। एतेन विषादो व्यज्यते निःश्वासानाम् अशिशिरतया अन्तस्तापोत्थत्वेन भिन्नवर्णः विच्छायः अधरोष्ठो यस्य तत् हस्ते न्यस्तं हस्तन्यस्तम् एतेन चिन्ता व्यज्यते लम्बालकत्वात् संस्कारामावान्नम्बमानकुन्तलत्वात् असकलव्यक्ति असम्पूर्णाभिव्यक्ति तस्याः प्रियायाः मुखं त्वदनुसरणेन त्वदुपरोधेन क्लिष्टकान्तेः क्षीणकान्तेः इन्दोः दैन्यं म्लानिं बिभर्त्ति नूनमिति वितर्के [ नूनं तर्केऽर्थनिश्चये इत्यमरः ]। पूर्ववत् तथापि न भ्रमितव्यमिति भावः ॥ २३ ॥

सर्वविरहिणीसाधारणानि लक्षणानि सम्भावनया दत्प्रेक्षाणीत्याह आलोके इत्यादिभिस्त्रिभिः । हे मित्र ! का मत्प्रिया बलिषु नित्येषु प्रोषितागमनार्थेषु च देव-

पृच्छन्ती वा मधुरवचनां सारिकां पञ्जरस्थां
कच्चिद्भर्तुः स्मरसि रसिके ! त्वं हि तस्य प्रियेति
॥२४॥

सारधनेषु व्याकुला व्यापृता वा विरहेण तनु क्षयं भाव-
गम्यं तत्कार्श्यस्य अदृष्टचरत्वात् सम्मति सम्भावनयोत्-
प्रेक्ष्यमित्यर्थः मत्सादृश्यं मदाकारसाम्यं मत्प्रतिकृति-
मित्यर्थः [ यद्यपि सादृश्यं नाम प्रसिद्धवस्त्वन्तरगतमाका-
रसाम्यं तथापि प्रतिकृतित्वेन विवक्षितम् इतरथा लेख्य-
त्वासम्भवात् अमरकोशे आलेख्ये च सादृश्यमित्यभिधा-
नाच्च ]। लिखन्ती क्वचित् फलकादौ विन्यस्यन्तीति वा
चित्तदर्शनस्य विरहिणीविनोदोपायत्वादिति भावः एतच्च
कामशास्त्रसंवादेन सम्यक् विवेचितमस्माभी रघुवंश-
सञ्जीवन्यां सादृश्यप्रतिकृतिदर्शनैः प्रियाया इत्यत्र। मधु-
रवचनां मञ्जुभाषिणीम् अतएव पञ्जरस्थां हिंस्रेभ्यः कृत-
संरक्षणामित्यर्थः सारिकां स्त्रीपक्षिविशेषं हे रसिके !
भर्तुः स्वामिनः स्मरसि किम् [ कच्चित् कामप्रवेदने इत्य-
मरः ]। कर्त्तारं स्मरसि किमित्यर्थः [ अधीगर्थदयेशां
कर्मणीति कर्मणि षष्ठी ]। स्मरणे कारणमाह हि यस्मात्
कारणात् त्वं तस्य भर्तुः प्रीणातीति प्रिया [ इगुपधज्ञा-
प्रीकिर इति कप्रत्ययः ]। अतः प्रेमास्पदत्वात् स्मर्तुमर्ह-
सीति भावः इत्येवं पृच्छन्ती वा वाशब्दो विकल्पे [ उप-
मानां विकल्पे वेत्यमरः ] ते तव आलोके दृष्टिपथे पुरा
निपतति सद्यो निपतिष्यतीत्यर्थः। [ स्यात् प्रबन्धे पुरा-

**उत्सङ्गे वा मलिनवसने सौम्य ! निक्षिप्य वीणां**
**मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा ।**
**तन्त्रीमार्द्रां नयनसलिलैः सारयित्वा कथञ्चिद्**
**भूयोभूयः स्वयमपि कृतां मूर्च्छनां विस्मरन्ती२५**

सीतं निकटागामिके पुरंध्यमरः । यावत्पुरानिपातयो-र्लंडिति लट् ] ॥ २४ ॥

उत्सङ्गे इति । हे सौम्य ! साधो । मलिनवसने [ प्रोषिते मलिना क्षयेति भास्कादित्यर्थः ] । उत्सङ्गे क्रोडे वीणां निक्षिप्य मम गोत्रं नाम मद्गः चिह्नं यस्मिन तत् मद्गोत्राङ्कं मन्नामाङ्कं यथा तथा [ गोत्रन्तु नाम्नि चेत्यमरः ] विरचितानि पदानि यस्य तत् तथोक्तं गेयं गानार्हं प्रबन्धादि गीतनिधि पाठे म एवार्थः उद्गातुम उच्चैर्गातुं कामो यस्याः सा [ तुम् काममनसोरिति मकारलोपः ] । दैवयोनित्वात् गान्धारग्रामं गातुकामेत्यर्थः [ तदुक्तं षड्जमध्यमनामानौ ग्रामौ गायन्ति मानवाः । न तु गान्धारनामानं स लभ्यो दैवयोनिभिरिति ] । तथा नयनसलिलैः प्रियतमस्मृतिजनितैः अस्रुभिः आर्द्रां तन्त्रीं कथञ्चित् कृच्छ्रेण सारयित्वा आर्द्रत्वापहरणाय करेण प्रमृज्य अन्यथा क्षणनाशसम्भवादिति भावः भूयोभूयः पुनः पुनः स्वयम् आत्मना कृतामपि विस्मरणान्नहीमपीत्यर्थः मूर्च्छनां स्वरारोहावरोहक्रमम् [ स्वराणां स्थापनाः सप्ता: मूर्च्छनाः सप्त सप्त हीति सङ्गीतरत्नाकरे ] । विस्मरन्ती वा आलोके ते निपततीति पूर्वेणान्वयः ।

शेषान्मासान् विरहदिवसस्थापितस्यावधेर्वा
विन्यस्यन्ती भुवि गणनया देहलीदत्तपुष्पैः ।
मत्सङ्गं वा हृदयनिहितारम्भमास्वादयन्ती
प्रायेणैते रमणविरहेष्वङ्गनानां विनोदाः ॥२५॥

विस्मरणं चात्र दयितगुणस्मृतिजनितमूर्च्छावशादेव [तथाच रमरत्नाकरे वियोगावस्थायामिष्टगुणानां कीर्त्तनात् स्मृतेः । साक्षात्कारोऽथवा मूर्च्छा दशधा जायते तथा ]। मत्-सादृश्यमित्यादिना मनःसङ्गानुवृत्तिः सूचिता ॥ २५ ॥

शेषानिति । अथवा विरहस्य दिवसः तस्मात् स्थापितस्य तत आरभ्य निश्चितस्य अवधेः अवसेयस्य शेषान् गतावशिष्टान् मासान देहलीदत्तपुष्पैः देहली द्वारस्याधारदारु गृहावग्रहणी देहलीत्यमरः ।। तत्र दत्तानि राशित्वेन निहितानि यानि पुष्पाणि तैर्गणनया एको द्वावित्यादि-संख्यानेन भुवि भूतले विन्यस्यन्ती वा पुष्पविन्यासैर्मासान् गणयन्ती वा इत्यर्थः । यद्वा हृदये निहितः मनसि सङ्कल्पितः आरम्भः उपक्रमो यस्य तम् अथवा हृदयनिहिताः आरम्भाः चुम्बनादयो व्यापारा यस्मिन् तं मत्सङ्गं मत्-सम्भोगगतिम् आस्वादयन्ती वा आलोके तं निपतति इति पूर्वेण सम्बन्धः । ननु कथमयं नियमः इत्याशङ्क्यामर्थान्तर-न्यासेन परिहरति, प्रायेण बाहुल्येन अङ्गनानां रमण-विरहेषु एते पूर्वोक्ता विनोदाः कालयापनोपायाः । एतेन सङ्कल्पावस्था उक्ता । तदुक्तं, सङ्कल्पो नाथविषयो मनोरथ उदाहृत इति ॥ २६ ॥

सव्यापारामहनि न तथा पीड़येन्मद्वियोगः
शङ्के रात्रौ गुरुतरशुचं निर्विनोदां सखीं ते।
मत्सन्देशैः सुखयितुमलं पश्य साध्वीं निशीथे
तामुन्निद्रामवनिशयनां सौधवातायनस्थः ॥२७
आधिक्षामां विरहशयने सन्निषण्णैकपार्श्वां
प्राचीमूले तनुमिव कलामात्रशेषां हिमांशोः।

सव्यापारामिति। हे सखे! अहनि दिवसे सव्यापारां पूर्वोक्तबलिचित्रलेखनादिव्यापारवतीं ते सखीं स्वप्रियां मद्वियोगः मद्विरहः तथा तेन प्रकारेण [प्रकारवचने थाल् इति थाल्प्रत्ययः]। न पीड़येत् यथा रात्रा-विति शेषः किन्तु रात्रौ निर्विनोदां निर्व्यापारां ते सखीं गुरुतरा शुक् यस्याः तां गुरुतरशुचम् अतिदुर्भरदुःखां शङ्के तर्कयामि [शङ्का वितर्कभययोरिति शब्दार्णवे]। अतो निशीथे अर्धरात्रे उन्निद्राम् उत्सृष्टनिद्राम् अवनिरेव शयनं शय्या यस्याः तां नियमार्थं स्वखिलशायिनीं साध्वीं पतिव्रताम्। [साध्वी पतिव्रतेत्यमरः] अतो नान्यथा शङ्कितव्यमिति भावः त्वत्सखीं तां मत्सन्देशैः मद्वार्त्ताभिः अलं पर्याप्तं सुखयितुमानन्दयितुं सौधवातायनस्थः सन् पश्य। [सखा धात्री च पितरौ मित्रदूतसुहृदादयः। सुखयन्तीष्टशयनसुखोपायैर्वियोगिनीमिति रत्नाकरे]। दूतत्वायं मेघ इति भावः। अनेन जागरावस्था उक्ता ॥ २७ ॥

पुनस्तामेव विशिनष्टि आधिक्षामामित्यादिभिश्चतुर्भिः।
आधिना मनोव्यथया क्षामां कृशाम्। [पुंस्याधिर्मानसी

नीता रात्रिः क्षण इव मया सार्द्धमिच्छारतैर्या
तामेवोष्णैर्विरहमहतीमश्रुभिर्यापयन्तीम् २८
पादानिन्दोरमृतशिशिरान् जालमार्गप्रविष्टान्
पूर्वप्रीत्या गतमभिमुखं सन्निवृत्तं तथैव ।
चक्षुः खेदात् सलिलगुरुभिः पक्ष्मभिश्छादयन्तीं
साभ्रेऽह्नीव स्थलकमलिनीं न प्रबुद्धां न सुप्ताम् २९

व्यथेत्यमरः । व्यायतेः कर्त्तरि क्तः । व्यायो म इति निष्ठा-तकारस्य मकारः ]। विरहे शयनं तस्मिन् विरहशयने पल्लवादिरचिते इत्यर्थः सन्निषण्णम् एकं पार्श्वं यस्याः ताम् अत एव प्राच्याः पूर्वस्याः दिशो मूले उदयगिरिप्रान्ते इत्यर्थः प्राचीग्रहणं क्षीणावस्याद्योतनार्थं मूलग्रहणं दृश्यतार्थम कलामात्रं कला एव शेषो यस्याः तां हिमांशोः तनुं मूर्त्तिमिव स्थितां तथा या रात्रिः मया सार्द्धम् इच्छया कृतानि रतानि तैः [ शाकपार्थिवादित्वान्मध्यपदलोपी समासः ]। क्षण इव नीता यापिता तां तज्जातीयाम् एव रात्रिं विरहेण महतीं महत्त्वेन प्रतीयमानाम् । उष्णैः अश्रुभिः यापयन्तीम् । [ यातेर्ण्यन्तात् शतृप्रत्ययः । अत्तिङ्शित्यादिना पुगागमः ]। स एव कान्तः सुखिनामग्र्यः प्रतीयते दुःखिनान्तु विपरीत इति भावः । एतेन कार्श्यावस्था उक्ता ॥ २८ ॥

पादानिति । जालमार्गप्रविष्टान् गवाक्षविवरगतान् अमृतमिव शिशिरान् इन्दोः पादान् रश्मीन् पूर्वप्रीत्या पूर्वस्नेहेन पूर्ववद् आनन्दकरा भविष्यन्तीति बुद्धिति भावः

**निःश्वासेनाधरकिसलयक्लेशिना विक्षिपन्तीं**
**शुद्धस्नानात् परुषमलकं नूनमागण्डलम्बम् ।**
**मत्सम्भोगः कथमुपनयेत् स्वप्नजोऽपीति निद्राम्**
**आकाङ्क्षन्तीं नयनसलिलोत्पीडरुद्धावकाशाम् २०**

अभिमुखं यथा तथा गतं तथैव सन्निवृत्तं यथा गतं तथैव प्रतिनिवृत्तं तदा तेषामतीव दुःसहत्वादिति भावः चक्षुः दृष्टिं खेदात् सलिलगुरुभिः अश्रुदुर्भरैः पक्ष्मभिः छादयन्तीम् अतएव साभ्रे दुर्दिने अद्य दिवसे न प्रबुद्धां मेघावरणादविकसितां न सुप्ताम् [ उभयत्रापि नञर्थस्य सुप्सुपेति समासः ]। स्थलकमलिनीमिव स्थिताम् । एतेन विषयद्वेषाख्या षष्ठी दशा सूचिता ॥२९॥

निःश्वासेनेति । शुद्धस्नानात् तैलादिरहितस्नानात् परुषं कठिनस्पर्शं नूनम् आगण्डलम्बम् [ सुप्सुपेति समासः ]। अलकं चूर्णकुन्तलान् [ जातावेकवचनम् ]। अधरकिसलयं क्लेशयति क्लिश्नातीति वा तेन तथोक्तेन उष्णेनेत्यर्थः [ क्लिश्यतेरण्न्तात् क्लिश्नातेरण्यन्ताद्वा ताच्छील्ये णिनिः ]। निःश्वासेन विक्षिपन्तीं चालयन्तीं तथा स्वप्नजोऽपि स्वप्नावस्थाजन्योऽपि सात्मसम्भोगासम्भवादिति भावः मत्सम्भोगः कथं केनापि प्रकारेण उपनयेत् आगच्छेत् इति आशयेतीति शेषः [ इति नैवोक्तार्थत्वाद्प्रयोगः प्रयोगे चापीलक्षत्यमित्यालङ्कारिकाः । प्रार्थनायां लिङ् ]। नयनसलिलोत्पीडेन अश्रुप्रहत्या रुद्धावकाशाम् आक्रान्त-

आद्ये बद्धा विरहदिवसे या मिखा दाम हित्वा
शापस्यान्ते विगलितशुचा तां मयोद्वेष्टनीयाम् ।
स्पर्शक्लिष्टामयमितनखेनासकृत् सारयन्तीं
गण्डाभोगात् कठिनविषमामेकवेणीं करेण ॥ ३१
सा सन्नद्धाभरणमबला पेशलं धारयन्ती
शय्योत्सङ्गे निहितमसकृद् दुःखदुःखेन गात्रम् ।
स्यानां दुर्लभामित्यर्थः निद्राम् आकाङ्क्षन्तीं स्वप्नहेतुत्वा-
दिति भावः । अत्रास्रुविसर्जनेन लज्जात्यागो व्यज्यते ॥३०॥

आद्ये इति । आद्ये विरहदिवसे दाम मालां हित्वा त्यक्त्वा या मिखा बद्धा ग्रथिता शापस्यान्ते विगलितशुचा वीतशोकेन मया उद्वेष्टनीयां मोचनीयां स्पर्शक्लिष्टां स्पर्शे सति मूलकेशेषु सव्यथामित्यर्थः कठिना च सा विषमा निम्नोन्नता च ताम् [खञ्जकुब्जादिवदन्यतरस्य प्राधान्यविवक्षया विशेषणं विशेष्येण बहुलमिति समासः ]। एकवेणीम् एकीभूतवेणीम् [ पूर्वकालेत्यादिना तत्पुरुषः ]। तां मिखाम् अयमिता अकर्त्तितोपान्ता नखा यस्य तेन करेण गण्डाभोगात् कपोलविस्तारात् असकृत् मुहुर्मुहुः सारयन्तीम् अपसारयन्तीं तां पश्येति पूर्वेण सम्बन्धः । असकृत् सारणात् चित्तविभ्रमदशा सूचिता ॥३१॥

सेति । अबला दुर्बला सन्नद्धाभरणं क्रमत्वान् परित्यक्ताभरणम् असकृत् अनेकशः दुःखदुःखेन दुःखप्रकारेण [ प्रकारे गुणवचनस्येति द्विर्भावः ]। शय्योत्सङ्गे निहितं पेशलं मृदुलं गात्रं शरीरं धारयन्ती वहन्ती अनेनात्यन्त-

**त्वामप्यस्रं नवजलमयं मोचयिष्यत्यवश्यं**
**प्रायः सर्वो भवति करुणावृत्तिरार्द्रान्तरात्मा ॥३२**

शक्त्या मूर्च्छावस्था सूच्यते । सा त्वत्सखी त्वामपि नवजल-मयं नवाम्बुरूपम् अस्रं वाष्पम् अवश्यं सर्वथा मोचयि-ष्यति [ द्विकर्मकत्वम् ] । तथाहि प्रायः प्रायेण आर्द्रान्त-रात्मा मृदुहृदयः मेघस्तु द्रवात्मःशरीरः सर्वः करुणा करु-णामयी वृत्तिः अन्तःकरणवृत्तिर्यस्य सः करुणावृत्तिर्भ-वति । अस्मिन्नवसरे सर्वथा शीघ्रं त्वया गन्तव्यम् अन-न्तरदशापरिहारायेति सन्दर्भाभिप्रायः ।

ननु किमिदमादिमां चक्षुःप्रीतिमुपेक्ष्य अवस्थान्तरा-ण्येव तत्रभवान् कविराहृतवान् ? उच्यते, सम्भोगो विप्रल-म्भश्च द्विधा शृङ्गार उच्यते । संयुक्तयोस्तु सम्भोगो विप्रलम्भो वियुक्तयोः । पूर्वानुरागमानाख्यप्रवासकरुणात्मना । विप्र-लम्भस्तुधात्र प्रवासस्तत्र च त्रिधा । कार्य्यतः सम्भ्रमाच्छा-पादस्मिन् काव्ये तु शापजः । प्रागसङ्गतयोर्यूनोः सति पूर्वानुरञ्जने । चक्षुःप्रीत्यादयोऽवस्था दश स्युस्तत्क्रमो यथा । हृन्नःसङ्गसङ्कल्पा जागरः क्षमतारतिः । क्ष्वीत्या-गोन्मादमूर्च्छान्ता दृत्यनङ्गदशा दश । पूर्वसङ्गतयोरेव प्रवास इति कारणात् । न तत्रापूर्ववत् चक्षुःप्रीतिरत्यन्ति-महेति । हृत्सङ्गस्य तु सिद्धस्याप्यविच्छेदोऽत्र वक्ष्यते । अनन्यापूर्ववद्वाच्या इति तावदवस्थितेः । वैयर्थ्यादादिमां हित्वा वैरस्याद्गलिमां तथा । हृत्सङ्गादिरिहावष्ट कवि-रष्टाविति स्थितिः । मलाढ्यं सिञ्चन्तीति यद्येऽस्मिन्

जाने सख्यास्तव मयि मनः सम्भृतस्नेहमस्मा
दित्थम्भूतां प्रथमविरहे तामहं तर्कयामि ।
वाचालं मां न खलु सुभगम्मन्यभावः करोति
प्रत्यक्षं ते निखिलमचिरात् भ्रातरुक्तं मया यत् ॥ २२

प्रतिपादिता। चक्षुःप्रीतिरिति प्रोक्तं निरुक्तरञ्जताननम्। चक्षुःप्रीतिर्भवेच्चित्रेष्वदृष्टचरदर्शनात्। यथा मालविकारूपमग्निमित्रस्य पश्यतः। प्रोषितानान्तु भर्तॄणां का दृष्टादृष्टपूर्वता। अथ तवापि सन्देहे स्वकलत्राणि पृच्छतु। किं मर्तृप्रत्यभिज्ञा स्यात् किं वैदेशिकभावना। प्रवासादागते स्वस्मिन्नित्यलं कलहैर्ह्रिया ॥ १२॥

ननु ईदृशीं दशामापन्नेति कथं त्वया निश्चितम् अत आह जाने इति। हे मेघ! तव सख्याः मनः मयि सम्भृतस्नेहं सञ्चितानुरागं जाने अस्मात् स्नेहज्ञानकारणात् प्रथमविरहे प्रथमग्रहणं दुःखातिशयद्योतनार्थम् त्वत्सखीम् इत्थम्भूतां पूर्वोक्तावस्थाम् आपन्नां तर्कयामि ननु सुभगमानिनामेष स्वभावो यदात्मनि स्त्रीणामनुरागप्रकटनं तत्राह वाचालमिति। सुभगम् आत्मानं मन्यते इति सुभगम्मन्यः [आत्ममाने खश् चेति खश्प्रत्ययः। अकर्तरि षदित्यादिना सुमागमः]। तस्य भावः सुभगम्मन्यभावः सुभगमानित्वं मां वाचालं बहुभाषिणं न करोति खलु सौन्दर्य्याभिमानात् न प्रलपामीत्यर्थः। [वाग्व्यक्तस्तु वाचालो वाचाटो बहुगर्ह्यवागित्यमरः। बालजाटयं बहुभाषित्वादयस्तद्गुणः]। किन्तु हे भ्रातः! मयोक्तं यदाधिक्यमात्मनित्यादि तत्

**रुद्वापाङ्गप्रसरमलकैरञ्जनस्नेहशून्य**
**प्रत्यादेशादपि च मधुनो विस्मृतभ्रूविलासम् ।**
**त्वय्यासन्ने नयनमुपरिस्पन्दि शङ्के मृगाक्ष्या**
**मीनक्षोभाच्चलकुवलयश्रीतुलामेष्यतीति ॥२४॥**
**वामश्चास्याः करुहपदैर्मुच्यमानो मदीयै-**

निखिलं सर्वम् अचिरात् शीघ्रमेव ते तव प्रत्यक्षं भविष्यतीति शेषः ॥ २३ ॥

रुद्धेति । अलकैः रुद्धाः अपाङ्गयोः प्रसराः यस्य तत् तथोक्तम, अञ्जनेन स्नेहः स्नेग्धंत्वं तेन शून्यम् अपि च किञ्च मधुनः मद्यस्य प्रत्यादेशात् निराकरणात् परित्यागादित्यर्थः [ प्रत्यादेशो निराकृतिरित्यमरः ]। विस्मृतः भ्रूविलासः भ्रूभङ्गी येन तत् तथोक्तं नयनस्य रुद्धापाङ्गप्रसरत्वादिकं विरहसमुत्पन्नमिति भावः । त्वयि आसन्ने सति स्वकुशलवार्त्तामुपलभ्येति शेषः । उपरि ऊर्द्ध भागे स्पन्दते स्फुरति इति उपरिस्पन्दि [ तथाच निमित्तनिदाने, स्पन्दान्मूर्ध्नि छत्रलाभं भाले पट्टं शुभं भ्रुवि । इष्टप्राप्तिं दृशोरूर्द्धमपाङ्गे हानिमादिशेदिति ]। मृगाक्ष्याः त्वत्सख्याः नयनं वाममिति शेषः [ वामभागस्तु नारीणां पुंसां श्रेष्ठस्तु दक्षिणः । दाने देवादिपूजायां स्पन्देऽलङ्करणेऽपि चेति स्त्रीणां वामभागप्राशस्त्यात् ]। मीनक्षोभात् मीनचलनात् चलस्य कुवलयस्य श्रिया शोभया तुल्यां सादृश्यम् एष्यतीति तर्कयामि ॥ २४ ॥

वाम इति । मदीयैः करुहपदैः नखपदैः [ पुंनपुंसः

मुक्ताजालं चिरपरिचितं त्याजितो दैवगत्या ।
संभोगान्ते मम समुचितो हस्तसंवाहनानाम्
यास्यत्यूरुः सरसकदलीस्तम्भगौरस्वलत्वम् ॥ ३५ ॥
तस्मिन् काले जलद ! यदि सा लब्धनिद्रासुखा स्याद्
अन्वास्यैनां स्तनितविमुखो याममात्रं सहस्व ।

करुहो नखोऽस्त्री नखरोऽस्त्रियामित्यमरः ] । मुच्यमानः परित्यज्यमाणः नखाङ्कैरहित इत्यर्थः [ ऊर्वोर्नखपदास्पदत्वन्तु रतिरहस्ये, कण्ठकक्षकुचपार्श्वभुजोरःश्रोणिसक्थिषु नखास्पदमाहुरिति ] । चिरपरिचितं चिराभ्यस्तं मुक्ताजालं मौक्तिकसरमयं कटिभूषणं दैवगत्या दैववशेन त्याजितः सम्प्रति नखपदोक्षाभावेन शीतोपचारस्य तस्य वैयर्थ्यादिति भावः [ त्यजतेर्ण्यन्तात् कर्मणि क्तः । द्विकर्मकपचादीनां चोपसर्ग्यानमिष्यते इति पचादित्वात् द्विकर्मकत्वम् ] । संभोगान्ते मम हस्तसंवाहनानां हस्तेन मर्दनानाम् । [ संवाहनं मर्दन स्यादित्यमरः ] । समुचितः योग्यः सरसः यः परिपक्वो न शुष्कश्च स एव विवक्षितः तत्रैव पाण्डिमसम्भवात् न चासौ कदलीस्तम्भश्च स इव गौरः पाण्डुरः [ गौरः करीरे सिद्धार्थे शुक्ले पीतेऽरुणेऽपि चेति मालतीमालायाम् ] । अस्याः प्रियायाः वामः ऊरुः; चलत्वं स्पन्दनं यास्यति प्राप्स्यते [ ऊरोः स्पन्दादृतिं विद्यादूर्वोः प्राप्तिं सुवाससः इति निमित्तनिदाने ] ॥ ३५ ॥

तस्मिन्निति । हे जलद ! तस्मिन् काले त्वदुपसर्पणकाले सा मत्प्रिया लब्धं निद्रासुखं यया तादृशी स्यात्

**मा भूदस्याः प्रणयिनि मयि स्वप्नलब्धे कथञ्चित्**
**सद्यः कण्ठच्युतभुजलतान्यस्य गाढोपगूढम्॥२६॥**
**तामुत्थाप्य स्वजलकणिकाशीतलेनानिलेन**
**प्रत्याश्वस्तां सममभिनवैर्जालकैर्मालतीनाम् ।**

यदि स्यात् चेत् एनां निद्राणाम् अन्वास्य पश्चादासिलेत्यर्थः [ उपसर्गवशात् सकर्मकत्वम् ]। स्तनितविमुखः गर्जितपराङ्मुखः निःशब्दः सन् अन्यथा निद्राभङ्गः स्यादिति भावः याममात्रं प्रहरमात्रम [ द्वौ यामप्रहरौ समावित्यमरः ]। सहस्व प्रतीक्षस्व [ प्रार्थनायां लोट् ]। अस्याः एकवारसुरतस्य यामावधिकत्वात् स्वप्नेऽपि भवितव्यम् इत्यभिप्रायः [ तथा च रतिसर्वस्वे, एकवारावधिर्यामो रतस्य परमो मतः। चण्डशक्तिमतोर्यूनोरुद्भटक्रमवर्त्तिनोरिति ]। यामसहनस्य प्रयोजनमाह मा भूदिति। अस्याः प्रियायाः प्रणयिनि प्रेयसि मयि कथञ्चित् कृच्छ्रेण स्वप्नलब्धे सति गाढोपगूढं गाढालिङ्गनम् [ नपुंसके भावे क्तः ]। सद्यः तत्क्षणं कण्ठात् च्युतः स्रस्तः भुजलतयोः ग्रन्थिः बन्धो यस्य तत् मा भूत् मास्तु कथञ्चिल्लब्धस्य विघातो मा भूदित्यर्थः। न चात्र निद्रोत्थितस्यामुत्थितामिति पूर्वोक्तेन निद्राच्छेदेन विरुध्यते पुनः सम्भ्रमाद्यवस्थासु पाश्चिकनिद्रासम्भवात्। तथा च रसरत्नाकरे, अश्रुक्षणी रोदनं निद्रा निर्ज्ञानर्थवाग् भ्रमः। सम्भ्रमादिषु जायन्ते हृन्नाभेदेषु वायुके इति ॥ २६ ॥

तामिति। तां प्रियां स्वस्य जलकणिकाभिः जलबिन्दुभिः

विद्युद्गर्भः स्तिमितनयनां त्वत्सनाथे गवाक्षे
वक्तुं धीरः स्तनितवचनैर्मानिनीं प्रक्रमेथाः ॥३७॥
भर्तुर्मित्रं प्रियमविधवे ! विद्धि मामम्बुवाहं

श्रोतसेन अनिलेन उत्थाप्य प्रबोध्य [एतेन तस्याः प्रभुत्वात् व्यजनानिलसमाधिर्व्येज्यते । यथाह भोजराजः, मृदुभिर्मंदनैः पादे श्रोतसेव्यजनैस्तनौ । श्रुतौ च मधुरैर्गीतनिद्रातो बोधयेत् प्रभुम् इति] । अभिनवैः नूतनैः मालतीनाजालकैः सम जातोकुड्मलैः सह [सुमना मालती जातिरिति, साक सवा सम सहेति, चारुको जालकं क्लीवे कलिका कोरकः पुमानिति च अमरः] । प्रत्यासन्ना शिशिरानिलसम्पर्कात् पुनरुज्जीविताभित्यर्थः [खसः कर्त्तरि क्तः । आदितश्चेति चकारादिट्प्रतिषेधः । एतेनास्याः सौकुमार्य्यं गम्यते । त्वत्सनाथे त्वत्सन्निधे [सनाथं प्रभुमित्याहुः सहितं चित्ततापिनीति शब्दार्णवे] । गवाक्षे स्तिमितनयनां कामी इति विस्मयनिश्चलनेत्रां मानिनीं मनस्विनीम अनौचित्यासहिष्णुमित्यर्थः विद्युत् गर्भः अन्तःस्था यस्य स विद्युद्गर्भः अन्तर्लीनविद्युत्क इत्यर्थः [गर्भोऽपवरकेऽन्तःस्थे कुक्षिस्थे चार्भके मत इति शब्दार्णवे] । दृष्टिप्रतिघातेन वक्त्रमुखावलोकनप्रतिबन्धकत्वात् न द्योतिष्यामिति भावः, धीरः दृढः सन अन्यथा स्खलनवादित्व-मानाश्वासनप्रसङ्गादिति भावः, स्तनितान्येव वचनानि तैः वक्तुं प्रक्रमेथाः उपक्रमस्व [लिङर्थे लिङ् । प्रोपाभ्यां समर्थाभ्यामित्यात्मनेपदम्] ॥ ३७ ॥

तत्सन्देशैर्हृदयनिहितैरागतं त्वत्समीपम्।
यो वृन्दानि त्वरयति पथि श्राम्यतां प्रोषितानां
मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि
॥३८।

इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा
त्वामुत्कण्ठोच्छ्वसितहृदया वीक्ष्य सम्भाव्य चैव।

सम्प्रति दूतस्य श्रोढजनाभिमुखीकरणचातुरीमुपदिशति भर्तुरिति। विधवा गतभर्तृका न भवतीति अविधवे। सभर्तृके। [अनेन भर्तृजीवनसूचनात् अनिष्टागमशङ्का वारयति] मा भर्तुः तव पत्युः प्रिय मित्र प्रियसुहृद् तवापि हृदयनिहितैः मनसि स्थापितैः तत्सन्देशैः तस्य भर्तुः सन्देशैः त्वत्समीपम् आगतं भर्तृसन्देशकथनार्थमागतमित्यर्थः. अम्बुवाह मेघ विद्धि जानीहि। न केवलमहं बान्धवो हरः किन्तु घटकोऽपीत्याशयेनाह, यः अम्बुवाहः अबलानां स्त्रीणां वेणयः तासां मोक्षे मोचने उत्सुकानि पथि श्राम्यता श्रान्तिमापद्यानां प्रोषितानां प्रवासिनां पान्थानाम् इत्यर्थः वृन्दानि सङ्घान् मन्द्रस्निग्धैः गम्भीरश्राव्यैः ध्वनिभिः गर्जितैः करणैः त्वरयति। पान्थोपकारिणो मे किमु वक्तव्यं सुहृदुपकारित्वमिति भावः ॥३८॥

भर्तृसख्यादिज्ञापनस्य फलमाह इतीति। इति एवम् आख्याते सति पवनतनयं हनुमन्तं मैथिली सीतेव सा सत्प्रिया उन्मुखी उत्कण्ठया औत्सुक्येन उच्छ्वसितहृदया विकसितचित्ता सती त्वां वीक्ष्य सम्भाव्य सत्कृत्य च

श्रोष्यत्यस्मात् परमवहिता सौम्य ! सीमन्तिनीनां
कान्तोदन्तः सुहृदुपगतः सङ्गमात् किञ्चिदूनः॥३८
तामायुष्मन् ! मम च वचनादात्मनश्चोपकर्त्तुं
ब्रूया एवं तव सहचरो रामगिर्याश्रमस्थः।
अव्यापन्नः कुशलमबले ! पृच्छति त्वां वियुक्तः
पूर्वाभाष्यं सुलभविपदां प्राणिनामेतदेव ॥४०॥

अस्मात् भर्तृमैत्रीज्ञापनात् परं सर्वं श्रोतव्यम् अवहिता अप्रमत्ता सती श्रोष्यत्येव। [अत्र सीताहनुमदुपमानात् अस्याः पातिव्रत्यं मेघस्य दूतगुणसम्पत्तिश्च व्यज्यते। तद्गुणास्तु रसाकरे, ब्रह्मचारी बली धीरो मायावी मानवर्जितः॥ धीमानुदारो निःशङ्को वक्ता दूतः स्त्रियां भवेदिति]। नन्वेवं वार्त्तामात्रश्रवणात् अस्याः को लाभ इत्याशङ्क्य अर्थान्तरं न्यस्यति, हे सौम्य ! साधो ! सीमन्तिनीनां वधूनाम् [नारी सीमन्तिनी वधूरित्यमरः]। सुहृदा सुहृत्त्वेन उपगतः प्राप्तः [सुहृत्पदं विप्रलम्भशङ्कानिवारणार्थम्] कान्तस्य वार्त्तां कान्तोदन्तः [वार्त्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यादित्यमरः]। सङ्गमात् कान्तसम्पर्कात् किञ्चिदूनः ईषदूनः तद्वत् एव आनन्दकारीत्यर्थः॥३८॥

सम्प्रति सन्दिशति तामिति। हे आयुष्मन् ! [प्रशंसायां मतुप्]। परोपकारसाध्यजीवित ! इत्यर्थः मम वचनं प्रार्थनावचनं तस्माच्च आत्मनः स्वस्य उपकर्त्तुञ्च परोपकारेण आत्मानं कृतार्थयितुमित्यर्थः [उपकारक्रियां प्रति कर्मत्वेऽपि तस्यानुपकरोत्यादिवत् सम्बन्धमात्रविव-

अङ्केनाङ्कं प्रतनु तनुना गाढतप्तेन तप्तं
श्वासेनाध्वश्रमदुनमविरतोत्कण्ठमुत्कण्ठितेन।
सप्तोत्कूलं समधिकतरोच्छ्वासिना दूरवर्त्ती
सङ्कल्पैस्तैर्विशति विधिना वैरिणा रुद्धमार्गं ४१।

छायामात्मन इति षष्ठी न विरुध्यते। यथाह, भारविः सा लक्ष्मीरुपकुरुते यया परेषामिति। तथा श्रीहर्षस्य, साधूनामुपकर्त्तुं लक्ष्मीं द्रष्टुं विहायसा गन्तुम्। न कुतूहलिकस्य मनश्चरितं च महात्मनां श्रोतुमिति। तथा च क्वचित् द्वितीयादर्शनात् सर्वत्र तथेति नाघवचनमनाघवचनमेव]। तां प्रियाम् एवं ब्रूयाः। किमिति, हे अबले! तव सहचरः भर्त्ता रामगिरेः चित्रकूटस्य आश्रमेषु तिष्ठतीति रामगिर्याश्रमस्थः सन् अव्यापन्नः न मृतः वियुक्तः वियोगं प्राप्तः दुःखी एवंविधः सन् त्वां कुशलं पृच्छति [दुह्यादित्वात् पृच्छतेर्द्विकर्मकत्वम्]। तथाहि सुलभविपदाम् अयत्नसिद्धविपत्तीनां प्राणिनाम् एतदेव कुशलमेव पूर्वाभाष्य प्रथममवश्यं वक्तव्यम्। [कृत्याश्चेत्यावश्यकार्थे ण्यत्प्रत्ययः।] ॥४०॥

अङ्केनेति। किञ्च दूरवर्त्ती दूरस्थः न च आगन्तुं शक्यते इत्याह, वैरिणा विरोधिना विधिना दैवेन रुद्धमार्गः प्रतिबद्धवर्त्मा स च ते सहचरः तनुना कृशेन गाढतप्तेन सान्द्रेण सास्रुषा उत्कण्ठा वेदना अस्य जाता उत्कण्ठितः तेन उत्कण्ठितेन [तदस्य सञ्जातम् इत्यादिना इतच्प्रत्ययः। उत्कण्ठतेर्वा कर्त्तरि क्तः]। समधिकतरम् अतिप्रबलम् उच्छ्वसितीति समधिकतरोच्छ्वासि तेन दीर्घनिःश्वासिनो-

**शब्दाख्येयं यदपि किल ते यः सखीनां पुरस्तात्**
**कर्णे लोलः कथयितुमभूदाननस्पर्शलोभात् ।**
**सोऽतिक्रान्तः श्रवणविषयं लोचनाभ्यामदृश्यः**
**स्नानुत्कण्ठाविरचितपदं मन्मुखेनेदमाह ॥४२॥**

त्यर्थः [ताच्छील्ये णिनिः] अङ्गेन शरीरेण प्रतनु कृशं तनुं वियोगदुःखेन क्षुष्टम् अस्रद्रुतम् अश्रुक्लिन्नम् [अस्रु नेत्राम्बु, रोदनश्वासमस्रु चेत्यमरः]। अविरतोत्कण्ठम् अविच्छिन्नवेदनम् उष्णोच्छ्वासं तीव्रनिःश्वासम् [तीक्ष्णं तीक्ष्णं खरं तीव्रं चण्डमुष्णं पटु स्मृतमिति हलायुधः]। अङ्गं त्वदीयं शरीरं तैः स्वसंवेद्यैः सङ्कल्पैः मनोरथैः विशति एकीभवतीत्यर्थः। [अत्र समानुरागित्वद्योतनाय नायकेन नायिकायाः स्वसमानावस्थत्वमुक्तम् ॥ ४१ ॥

सम्प्रति स्वावस्थानिवेदनाय प्रस्तौति शब्दाख्येयमिति। हे अबले। यः ते प्रियः सखीनां पुरस्तात् अग्रे आननस्पर्शे त्वन्मुखसम्पर्के लोभात् गार्द्ध्यात् अधरपानलोभादित्यर्थः शब्दाख्येयं शब्देन रवेण आख्येयम् उच्चैर्वाच्यम् अपि यत् तद्वचनमपीति शेषः कर्णे कथयितुं लोलः लालसः अभूत् किल [लोलुपो लोलभो लोभी लालसो लम्पटोऽपि चेति यादवः]। अनणविषयं कर्णपथम् अतिक्रान्तः तथा लोचनाभ्याम् अदृश्यः अतिदूरत्वात् द्रष्टुमशक्य इति भावः, स ते प्रियः त्वाम् उत्कण्ठया विरचितानि पदानि सुप्तिङन्तशब्दाः वाक्यानि वा यस्य तत् तथोक्तम् [पदं शब्दे च वाक्ये चेति विश्वः]। इदं वक्ष्यमाणं

श्यामास्वङ्गं चकितहरिणीप्रेक्षणे दृष्टिपातं
वक्त्रच्छायां शशिनि शिखिनां बर्हभारेषु केशान् ।
उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान्
एकस्थं ते क्वचिदपि न ते चण्डि ! सादृश्यमस्ति

॥ ४२ ॥

श्यामास्वङ्गमित्यादिकं मन्त्रेण आह मद्यावधानेन स एव दूतो दृश्यर्थः ॥ ४२ ॥

[सदृश्यप्रतिकृतिसम्प्रदर्शनतदङ्गसृष्टसमर्प्याश्वत्वारो विरहिणां विनोदोपायाः । तथाचोक्तं पताकायां, वियोगे प्रियजनसदृशानुभवनं ततश्चित्रं कर्म इति नवमे दर्शनमपि । तदङ्गसृष्टानामुपगतवतां समर्पनमपि प्रतीकारोऽनुध्यधितमनसां कोऽपि गदित इति]। तत्र सदृश्यवस्तुदर्शनमाह श्यामास्विति। श्यामास्तु प्रियङ्गुलतास्तु [ श्यामा तु मदिराख्यया । लता गोवल्ली गुन्द्रा प्रियङ्गुः फलिनी फल्गीत्यमरः ]। अङ्गं शरीरम् उत्पश्यामि सौकुमार्यादिसाम्यात् अङ्गमिति तर्कयामीत्यर्थः तथा चकितहरिणीनां प्रेक्षणे दृष्टिपातं शशिनि चन्द्रे मुखच्छायां मुखकान्तिं तथा शिखिनां बर्हिणां बर्हभारेषु बर्हसमूहेषु केशान् प्रतनुषु स्वल्पासु नदीनां वीचिषु [ अत्र वीचीनां विशेषणोपादाने न अनुक्तविशेषणोपलक्षणत्वात् भ्रूसाम्यनिर्वाहाय अनुक्तनदीविशेषणकरणार्थत्वात् तथा । तनुत्वं रहस्यत्वादौ, अल्पत्वादौ गुणीभूते भावोक्तौ हीनत्वादौ । विशेषणवाद्विशेषणस्य गतानुगतिकत्वात् । गुणो विशेषणम् ]।

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलायाम्
आत्मानं ते चरणपतितं यावदिच्छामि कर्तुम् ।
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः ॥४१॥

भ्रूविलासान् [भ्रूपताका इति पाठे भ्रुवः पताका इवेत्युपमितिसमासः । उत्सहामीति सर्वत्र सम्बध्यते ] त्वयापि नास्ति मनोनिर्वृतिरित्याशयेनाह हन्तेति । हन्त विषादे [हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोरित्यमरः ]। हे चण्डि ! कोपने ! [चण्डस्त्वत्यन्तकोपन इत्यमरः । गौरादित्वात् ङीष् ]। उपमानकथनमात्रेण न कोपितव्यमिति भावः, क्वचिदपि एकस्मिन्नपि वस्तुनि ते तव साहसं नास्ति अतो न निर्वृणोमीत्यर्थः । [अनेन अस्य सौन्दर्यमनुपमम् इति ध्वन्यते] ॥ ४१ ॥

सम्प्रति प्रतिकृतिदर्शनमाह त्वामिति । हे प्रिये ! प्रणयेन प्रेमातिशयेन कुपितां कुपितावस्थामुत्तमां त्वां स्वत्प्रतिकृतिमित्यर्थः धातवः गैरिकादयः [ धातुर्वातादिमध्वादिगैरिकादिष्वजादिष्विति यादवः ]। ते एव रागाः रक्तवर्ण्यानि [ विलादिरक्तवर्णे स्यादावस्ते रक्ते पुमानिति मेदिनीकरे ]। तैः धातुरागैः शिलायां शिलापट्टे आत्मानं निर्मलं मां स्वत्प्रतिकृतिमित्यर्थः ते तव चित्रमालेखा इत्यर्थः चरणपतितं कर्तुं तथा लिखितं मामपि दृष्ट्वा यावत् दृष्टिरालुप्यते अश्रुभिः प्रावृष्ट

मामाकाशप्रणिहितभुजं निर्दयाश्लेषहेतो-
र्लब्धायास्ते कथमपि मया स्वप्नसन्दर्शनेषु ।
पश्यन्तीनां न खलु बहुशो न स्थलीदेवतानां
मुक्तास्थूलास्तरुकिसलयेष्वश्रुलेशाः पतन्ति ॥४५॥

अस्रैः अश्रुभिः कर्तृभिः [ अस्रमश्रुणि मांसिते इति विश्वः ]। मे दृष्टिः आलुप्यते आव्रियते इत्यर्थः ततः दृष्टि-प्रतिबन्धात् लेखनं प्रतिबध्यते इति भावः, क्रूरः घातुकः [ नृशंसो घातुकः क्रूर इत्यमरः ]। कृतान्तः दैवम्। [ कृतान्तो यमसिद्धान्तदैवाकुशलकर्मसित्यमरः ]। तस्मिन् अपि चिन्नेऽपि नौ आवयोः [ युष्मदस्मदोः षष्ठीचतुर्थी-द्वितीयास्थयोर्वान्नावाविति नावादेशः ] सङ्गमं सहवासं न सहते। सङ्गमलेखनमप्यावयोरसहमानं दैवमावयोः साक्षात् सङ्गमं न सहते इति किमु वक्तव्यम् अपिशब्दार्थः ॥ ४४ ॥

अधुना स्वप्नदर्शनमाह मामिति। सुप्तस्य विज्ञानं स्वप्नः [ स्वप्नः सुप्तस्य विज्ञानमिति विश्वः ]। सन्दर्शनं संवित् [ दर्शनं समये शास्त्रे दृष्टौ स्वप्नेऽक्षि संविदीति शब्दार्णवे ]। स्वप्ना इति सन्दर्शनानि स्वप्नज्ञानानि [ चूत-दत्तादिवत् सामान्यविशेषभावेन सहप्रयोगः ]। तेषु मया बहुशः अपि महता प्रयत्नेन लब्धायाः गृहीतायाः दृष्टायाः इति यावत् ते तव निर्दयाश्लेषः गाढालिङ्गनं स एव हेतुः तस्य निर्दयाश्लेषार्थमित्यर्थः [ षष्ठी हेतुप्रयोग इति षष्ठी ]। आकाशं निर्विषये प्रणिहितभुजं प्रसारितबाहुं

भित्त्वा सद्यः किसलयपुटान् देवदारुद्रुमाणां
ये तत्क्षीरस्रुतिसुरभयो दक्षिणेन प्रवृत्ताः।
आलिङ्क्षन्ते गुणवति! मया ते तुषाराद्रिवाताः
पूर्वं स्पृष्टं यदि किल भवेदङ्गमेभिस्तवेति ॥४६॥

मां पश्यन्तीनां स्थलदेवतानां मुक्ताः मौक्तिकानि इव स्थूलाः अश्रुलेखाः वाष्पबिन्दवः तरुकिसलयेषु अनेन चेला-ञ्चलेन अश्रुधारणसमाधिर्ध्वन्यते बहुधा न पतन्तीति न किन्तु पतन्त्येव इत्यर्थः। [निश्चये नञ्द्वयप्रयोगः। तथाचा-लङ्कारिकसूत्रं स्मृतिनिश्चयसिद्ध्यर्थेषु नञ्द्वयप्रयोग इति। महात्मगुरुदेवानामश्रुपातः क्षितौ यदि। देशभ्रंशो महा-दुःखं मरणञ्च ध्रुवमिति क्षितौ देवताश्रुपातनिषेधदर्शनात् यच्चस्य मरणाभावसूचनार्थं तरुकिसलयेषु पतन्तीत्युक्तम्] ॥ ४५ ॥

इदानीं तदङ्गस्पृष्टवस्तुस्पर्शनमाह भित्त्वेति। देवदा-रुद्रुमाणां किसलयपुटान् पल्लवपुटान् सद्यः भित्त्वा ये तत्-क्षीरस्रुतिसुरभयः तेषां देवदारुद्रुमाणां क्षीरस्रुतिभिः क्षीरनिष्यन्दैः सुरभयः सुगन्धयः तुषाराद्रिवाततले लिङ्गमिदं ये वाताः दक्षिणेन दक्षिणमार्गेण [ तृतीयाविधाने प्रकृत्या-ह्यादिभ्य उपसङ्ख्यानात् तृतीया समेन यातीतिवत् तत्रापि करणत्वस्य प्रतीयमानत्वात् कर्तृकरणयोरेव तृतीयेति भाष्यकारः ]। प्रवृत्ताः चलिताः, हे गुणवति। सौगीत्व-सौकुमार्यादिगुणसम्पन्ने! ते तुषाराद्रिवाताः पूर्वं प्राक् एभिः वातैः तव अङ्गं स्पृष्टं भवेत् यदि किलेति सम्भावित-

संक्षिप्येत क्षण इव कथं दीर्घयामा त्रियामा
सर्वावस्थास्वहरपि कथं मन्दमन्दातपं स्यात् ।
इत्थं चेतश्चटुलनयने ! दुर्लभप्रार्थनं मे
गाढोष्माभिः कृतमशरणं तद्वियोगव्यथाभिः ॥४७
नन्वात्मानं बहु विगणयन् आत्मनैवावलम्बे
तत्कल्याणि ! त्वमपि सुतरां मा गमः कातरत्वम् ।

मेतदिति बुद्धेरित्यर्थः [ वार्त्तासम्भाव्ययोः किलेत्यमरः ]। मया आलिङ्गयन्ते आश्लिष्यन्ते । [अत्र वायूनां स्पृश्यत्वेऽपि अमूर्त्तत्वेन आलिङ्गनायोगात् आलिङ्गयन्ते इत्यभिधानं यक्षस्य उन्मत्तत्वात् प्रलपितमित्यदोषः इति वदन् निरुक्तकारः स्वयमेव उन्मत्तप्रलापीत्युपेक्षणीयः] ॥ ४६ ॥

संक्षिप्येतेति । दीर्घाः यामाः प्रहराः यस्यां सा दीर्घयामा विरहवेदनया तथा प्रतीयमानेत्यर्थः त्रियामा रात्रिः [ आद्यन्तयोर्दीर्घयामयोरिह व्यवहारात् त्रियामेति क्षीरस्वामी ]। क्षण इव कथं केन प्रकारेण संक्षिप्येत लघूक्रियेत अहः अपि सर्वावस्थासु सर्वकालेषु इत्यर्थः मन्दमन्दो मन्दप्रकारः [ प्रकारे गुणवचनस्येति द्विरुक्तिः । कर्मधारयवदुत्तरैरिति कर्मधारयवद्भावात् सुपो लुक् ]। मन्दमन्दातपं अत्यल्पसन्तापं कथं स्यात् न स्यादेव, हे चटुलनयने ! चञ्चलाक्षि ! इत्थम् अनेन प्रकारेण दुर्लभप्रार्थनम् अप्राप्यमनोरथं मे मम चेतः गाढोष्माभिः अतितीव्राभिः वियोगव्यथाभिः अशरणम् अनाथं कृतम् ॥ ४७ ॥

[अत्र = अस्मिन्नुत्तरमेघावयवेन मेतव्यमित्याह तन्निमित्तं ।

कायत्वान्तं सुखमुपनतं दुःखमेकान्ततो वा
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ॥४८॥
प्रापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ
शेषान् मासान् गमय चतुरो लोचने मीलयित्वा।

ननु इति आमन्त्रणे। प्रस्रावधारणानुज्ञानुनयामन्त्रणे नान्वित्यमरः]। ननु प्रिये! बहु विगणयन् प्रापान्ते सति एवमेवं करिष्यामीति आवर्त्तयन् आत्मानम् आत्मनैव स्वेनैव [प्रकृत्यादिभ्य उपसंख्यानम् इति तृतीया]। अवलम्बे धारयामि यथाकथञ्चित् जीवामि इत्यर्थः, तत् तस्मात् कारणात्, हे कल्याणि! सुभगे! त्वत्सौभाग्येनैव जीवामीति भावः [वष्ट्रादिभ्यश्चेति ङीष्]। त्वमपि सुतरामत्यन्तं कातरत्वं भीरुत्वं मा गमः मा गच्छ [गमेर्माङि-लुङ्। न माङ्योगे इत्यडागमाभावः]। तादृक्सुखिनो-रावयोः ईदृशि दुःखे कथं न बिभेमीत्याशङ्क्याह कस्येति। कस्य जनस्य अत्यन्तं नियतं सुखम् उपनतं प्राप्तम् एकान्ततः नियमेन दुःखं वा उपनतं, किन्तु दशा अवस्था चक्रस्य रथाङ्गस्य नेमिः अन्तः [चक्रं रथाङ्गं तस्यान्ते नेमिः स्त्री स्यात् प्रधिः पुमानित्यमरः]। तस्याः क्रमेण परि-पाट्या [क्रमः शक्तौ परीपाट्यामिति विश्वः]। नीचैः अधः उपरि च गच्छति प्रवर्त्तते जन्तोः सुखदुःखे पर्या-वर्त्तेते इत्यर्थः ॥ ४८ ॥

न च निरवधिरयमेतद् दुःखमित्याह प्रापान्त इति। शार्ङ्गं नाम धनुः पाणौ स्थितं यस्य तस्मिन् शार्ङ्गपाणौ

पश्चादावां विरहगणितं तं तमात्माभिलाषं
निर्वेक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपासु ॥४९॥

विष्णौ [ सप्तम्युपसानेत्यादिना बहुलाहि. । प्रहरणार्थस्य: परे निष्ठामप्तम्यो भवत इति वक्तव्यात् पाणिशब्दस्योत्तर-निपात: ] । भुजग: शेष. एव शयन तस्मात् उत्थिते सति मे शापान्त: शापावसानं भविष्यतीति शेष:, शेषान् अव-शिष्टान् चतुरो मेघदर्शनप्रभृति हरिबोधनदिनान्तमित्यर्थ: दशदिवसाधिक्यन्तु न विवक्षितमित्यङ्गमेव लोचने मील-यित्वा निमील्य गमय धैर्येण अतिवाहय इत्यर्थ:, पश्चात् अनन्तर त्वञ्च अहञ्च आवाम् [ त्यदादीनि सर्वैर्नित्यमित्ये-कशेष: । त्यदादीनां मिथोऽन्वये यत् परं तच्छिष्यते इति अस्मद: शेष: ] । विरहे गणितम् एवमेव करिष्यामीति मनसि आवर्त्तितं तं तम् [ वीप्सायां द्विरुक्ति: ] । आत्मनो: आवयो: अभिलाषं मनोरथं परिणता: शरच्चन्द्रिका: यासां तासु क्षपासु रात्रिषु निर्वेक्ष्याव: भोक्ष्यावहे । [ विश्रति-ल्टं ट् । निर्वेशो भृतिभोगयोरित्यमर: । अत्र कैश्चित् नभोनभस्ययोरेव वार्षिकत्वात् कथमाषाढ़ादिचतुष्टयस्य वार्षिकत्वमुक्तमिति चोदयित्वा ऋतुत्रयपक्षाश्रयणाद् अवि-रोध इति पर्य्यहारि वत्सर्वमसङ्गतम् । अत्र गतशेषाश्चत्वारो मासा इत्युक्तं कविना, न तु ते वार्षिका इति तस्मादृतु-त्रयपक्ष एव । यच्च नाथेनोक्तं कथमाषाढ़ादिचतुष्टयात् परं शरत्काल इति तत्रापि आकाङ्क्षिकसमासे: शरत्का-लानुपपत्ते: परिणतशरच्चन्द्रिकासु इत्युक्तं न तु तदैव प्रादुर्भाव इत्यविरोध एव ॥ ४९ ॥

भूयश्चाह त्वमपि शयने कण्ठलग्ना पुरा मे
निद्रां गत्वा किमपि रुदती सस्वरं विप्रबुद्धा।
सान्तर्हासं कथितमसकृत् पृच्छतश्च त्वया मे
दृष्टः स्वप्ने कितव! रमयन् कामपि त्वं मयेति॥५०

एतस्मान्मां कुशलिनमभिज्ञानदानाद्विदित्वा
मा कौलीनाच्चकितनयने! मय्यविश्वासिनी भूः।

सस्मार तस्या मेघवक्त्रगतानिरामाय अतिगूढ-
मभिज्ञानम् उपदिशति भूय इति हे अबले! भूयः
पुनरपि आह त्वङ्कर्त्ता मन्मुखेनेति शेषः मेघवचनमेतत्
किमित्यत आह पुरामच्छ्विरातीति (स्यात् प्रबन्धे चिरा-
तीते निकटागामिके पुरेत्यमरः)। पुरा पूर्वं शयने मे
कण्ठलग्नापि त्वं गले बद्धग्न कदापि गमनं न सम्भवे-
दिति भावः निद्रां गत्वा किमपि केन वा निमित्तेन
इत्यर्थः सस्वरं सशब्दम् उच्चैरित्यर्थः रुदती सती विप्रबुद्धा
आसीरिति शेषः। अमकात् बहुशः पृच्छतः रोदननिमि-
मिति शेषः. मे मम हे कितव! त्वं कामपि रमयन् मया
स्वप्ने दृष्ट इति त्वया सान्तर्हासं समन्दहासं यथा तथा
कथितञ्च इति त्वङ्कर्त्ता भूयश्चाहेति योजना॥ ५०॥

एतस्मादिति। एतस्मात् पूर्वोक्तात् अभज्ञानदानाख्यनै-
मित्तिकात् अभिज्ञानं लक्षणं तस्य दानात् कथनात् मां कुश-
लिनं क्षेमवन्तं विदित्वा ज्ञात्वा हे अमितनयने! कस्मै
जनसमूहे भवात् कौलीनात् लोकप्रवादात् एतावता
कालेन परावृत्तोऽसि अत्यक्षतीति जनप्रवादादित्यर्थः

स्नेहानाहुः किमपि विरहे ध्वंसिनस्ते त्वभोगा-
दिष्टे वस्तुन्युपचितरसाः प्रेमराशीभवन्ति ॥५१॥

आश्वास्यैवं प्रथमविरहोद्ग्रहोकां सखीं ते
शैलादाशु त्रिनयनवृषोत्खातकूटान्निवृत्तः ।

[स्यात् कोलीनं लोकवादे युद्धे पक्षच्छिदविषाणमित्रमरः] ।
मयि विषये अविध्यायिनी मरणशङ्किनी मा भूः न भव [भव-
तेर्लुङ् न माङ्योगे इत्यडागमप्रतिषेधः] । न च दीर्घकाल-
विप्रकर्षात् पूर्वस्नेहनिवृत्तिः शङ्क्या इत्याह स्नेहानिति ।
किमपि किंवा निमित्तं न विद्यते इति शेषः स्नेहान् प्रीतीः
विरहे सति अन्यो व्यविप्रकर्षे सति ध्वंसिनः विनश्वरान् आहुः
खलु तदा न भवतीति अभिप्रायः किन्तु ते स्नेहा अभोगात्
विरहे भोगाभावात् हेतोः [प्रसज्यप्रतिषेधोऽपि नञ्-
समास इष्यते] । दृष्टे वस्तुनि विषये उपचितः रसः स्वादः
येषु ते उपचितरसाः सन्तः प्रवृद्धतृष्णा इत्यर्थः [रसो गन्धे
रसं स्वादे तिक्तादौ विषरागयोरिति विश्वः] । प्रेमराशी-
भवन्ति वियोगासहिष्णुतामापद्यन्ते इत्यर्थः] स्नेहप्रेमयो-
रवस्थाभेदात् भेदः । तदुक्तम्, आलोकनाभिलाषो रागस्नेहो
ततः प्रेमा । रतिमृङ्गारो योगे वियोगतो विप्रलम्भश्चेति ।
तदेव स्फुटीकृतं रसाकारे, प्रेमा दिदृक्षा रम्येषु तद्विषया
भिलाषकः । रागस्तल्लक्षणवृद्धिः स्यात् स्नेहस्तत्प्रवण-
क्रिया । तद्वियोगासहं प्रेम रतिस्तल्लक्षणवर्त्मनम् । स्मरा-
दयस्तस्य क्रीडा संयोगः सप्तधा स्मरादिभिः] ॥ ५१ ॥

[स्नेहानाहुः किमपि विरहे ध्वंसिनस्ते त्वभोगा-
दिष्टे वस्तुन्युपचितरसाः प्रेमराशीभवन्ति ॥५१॥

आश्वास्यैवं प्रथमविरहोद्ग्रहोकां सखीं ते
शैलादाशु त्रिनयनवृषोत्खातकूटान्निवृत्तः ।

[स्यात् कोलीनं लोकवादे युद्धे पक्षच्छिदविषाणमित्रमरः] ।
मयि विषये अविध्यायिनी मरणशङ्किनी मा भूः न भव [भव-
तेर्लुङ् न माङ्योगे इत्यडागमप्रतिषेधः] । न च दीर्घकाल-
विप्रकर्षात् पूर्वस्नेहनिवृत्तिः शङ्क्या इत्याह स्नेहानिति ।
किमपि किंवा निमित्तं न विद्यते इति शेषः स्नेहान् प्रीतीः
विरहे सति अन्यो व्यविप्रकर्षे सति ध्वंसिनः विनश्वरान् आहुः
खलु तदा न भवतीति अभिप्रायः किन्तु ते स्नेहा अभोगात्
विरहे भोगाभावात् हेतोः [प्रसज्यप्रतिषेधोऽपि नञ्-
समास इष्यते] । दृष्टे वस्तुनि विषये उपचितः रसः स्वादः
येषु ते उपचितरसाः सन्तः प्रवृद्धतृष्णा इत्यर्थः [रसो गन्धे
रसं स्वादे तिक्तादौ विषरागयोरिति विश्वः] । प्रेमराशी-
भवन्ति विय

**सामिज्ञानप्रहितकुशलस्तद्वचोभिर्ममापि**
**प्रातःकुन्दप्रसवशिथिलं जीवितं धारयेथाः ॥५२॥**
**कश्चित्सौम्य व्यवसितमिदं बन्धुकृत्यं त्वया मे**
**प्रत्यादेशान्न खलु भवतो धीरतां तर्कयामि ।**
**निःशब्दोऽपि प्रदिशसि जलं याचितश्चातकेभ्यः**
**प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव ॥५३॥**

दुःखं ते सखीम् एवं पूर्वोक्तरीत्या आश्वास्य उपजीव्य विरचनस्य ब्रह्मकस्य हर्षेण हर्षभेण उत्क्षाताः अवहारिताः कूटाः शिखराणि यस्य तस्मात् [ कूटोऽस्त्री शिखरं शृङ्गमित्यमरः । शैलात् कैलासात् आशु निहन्तः प्रत्याहन्तः सन् सामिज्ञानं सहचरणं यथा तथा प्रहितं प्रेषितं कुमर्दं क्षेषु तैः सखाः त्वत्सख्याः वचोभिः ममापि प्रातःकुन्दप्रसवमिव शिथिलं दुर्बलं मम जीवितमपि धारयेथाः कामय । [ प्रार्थनायां लिङ् ] ॥ ५२ ॥

सम्प्रति मेघस्य प्रार्थनाङ्गीकारं प्रश्नपूर्वकं कथयति कश्चिदिति । हे सौम्य ! साधो ! इदं मे बन्धुकृत्यं बन्धुकार्यम् [ देवदत्तस्य गुरुकुलमिति वत् प्रयोगः ] । व्यवसितं कश्चित् करिष्यामीति निश्चितं किम् [ कश्चित् आमप्रवेदने इलमरः । अभिप्रायप्रापणं आमप्रवेदनम् ] । न च ते तूष्णीमावाङ्गीकारं यदि यत्स्ते स एव उचित इत्याह प्रत्यादेशात् करिष्यामीति प्रतिवचनात् [ उक्तिरामाथयं याच्ञादेयो वचनं मम इति यज्ञदत्तवे ] । भवतः तव धीरतां धैर्यं न तर्कयामि न सम्भावये खलु । यदि आमप्रवेदनाङ्गीकारं न लभते, याचितः सन् निःशब्दोऽपि निर्गर्जितोऽपि अम्बुदानामधीश्वरः चातकेभ्यः जलं प्रदिशति ददाति । हि यस्मात् सतां सत्पुरुषाणां प्रणयिषु याचकेषु किमुत दीनजनादिषु अपि सम्बन्धिषु

[illegible] [illegible] [illegible] [